The travel by the pregnant queen and the family preceptor before they reached the safety of the Eli hills, as described in the first canto of the Mûṣikavamśa was along a land route and they are described as having passed through various kingdoms. The queen waut nostalgic about her lost kingdom when she saw these kingdoms. Hers travel along a land route fits with the idea of an escape from the Hehâya kingdom along south Indian land and entry into Kerala through an entry point in the south, Was it Veli a hill in the southern most point in the former Kerala? The area is connected with Bhārgava Rāma, a temple dedicated to whom exists in nearby Tiruvallam? We are also told of Rāmaghata her son later conducting an expedition to Māhiṣmati in Hehaya to defeat the usurper there. That the queen travelled along a land roure is made clear by the following verses.

---

* Kunjunni Raja: The contribution of Kerala to Sanskrit literature.

पुराणि राष्ट्राणि च वीक्ष्य भूयशो
जहत्यनाथा न समृद्धिमुत्तरां
प्रवृत्तबाष्पाम्बुपरीतलोचना
तथाविधां तां स्वभुवं समस्मरत्।।

कथञ्चिदाशामपहाय दक्षिणां
हृतामुना नातिचिरान्मनस्विनी
पदैरवापद्गुरुगर्भमन्थरैः
पयोधिवेलाश्रयमेलिनं गिरिम् ।। (canto-I)

Attention is invited to the underlined word (southern). There is no evidence in the Mūṣikavaṁśa for any sea-trip which the queen and the preceptor made prior to landing in Eli hills as suggested by some writers like Balakrishnan Nayar.

Rāmaghaṭa's expedition

Another important geographical evidence needs to be mentioned here. Rāmaghaṭamūsika, the founder of the dynasty is said to conquer all **adjoining** kingdoms of **Daksiṇāpatha** and move along the coast of the **Pūrvasindhu** (eastern sea) before he reached the Vindhya mountain to attack the king who occupied his ancestral city of Māhiṣmati. This route should show a king who ruled a southern kingdom moving through the Deccan along the east coast of India to reach the Vindhya mountain.

Earlier, the same king moves along the west coast to go to Eli hill to pay obeisance to the hill and to Bhārgavarāma performing penance there. He passes through several places,-villages and towns. Such a lengthy passage is not possible or necessary from the traditional Kolattunād capital to nearby Eli hill. It may be mentioned that the king does not go northward as surmised by some scholars.

Concerning Kōla

The most important place referred to in the Mūsikavaṁśa is Kōla. It is mentioned as the Kularājadhānī (the capital) which

Rāmaghaṭamûṣika established. It is a city and not a country of that name, though later the kingdom is also occasionally mentioned as Kōla as alternating with Mûṣika kingdom. But which is this place? The capital of the Kolattunād kingdom was Cirakkal. No particular place as such has been identified in the north as Kolam, quite apart from Kolattunàd kingdom or royal family. It may therefore be sensible to conclude that the Kōlam mentioned in Kōlàbhidhānam Kularājadhānī is either Kollam (Quilon) or Kovalam, the seat of an ancient family of kings The kingdom also came to be known as Kola (Kollam or Kovalam) in alternation to Mûṣika as evidenced by important Keralolpatti texts.

Is a re-examination necessary?

The purpose of the few points just mentioned above is to suggest some difficulties which stand in the way in accetpting the currently held view identifying the Mûṣika kingdom with the Kolattiri kingdom, and as lying just south of the Tuḷu kingdom. It is conceded that there is the question of the identification of some of the places, temples and so on mentioned largely in the 14th and 15th cantos of the Mûsikavamśa with well-known places in North Kerala. But a question may be asked here. Could lt be that conquests and alliances led to the extension of the southern Mūṣika kingdom to the north into an area where places like celūr existed? The Kerololpatti texts hint at such extension in its omission of Kerala in some texts, and Mûṣika in others. The history of the Mûṣika kingdom extending over several centuries is given in the Mūṣikavamśa. The later cantos describe kings who were great conquerors. The history as given in these later canto may be the history of the kingdom when it extended from its southern home to its northern acquisition.

Acknowledgements

I have received the whole-hearted co-operation of some of the officers of my department in preparing and publishing this edition. Research officer Sri. M, Madhavan Unni helped in preparing copies of the manuscripts, discussing, reading and correting proof-sheets. Sri S. Muralidharan Nayar Assistant Research officer saw through the arduous task of seeing the work through the press, correcting proof-sheets and getting it ready for publication against a date line. Sri N. Sreedharan Nair, Assistant Research Officer copied the Keralolpatti texts for examination and helped with comparing the copies of the Mūṣikavamsá manuscripts. Sri N. Sundaram Sri H. Sadanandan Potti and Sri P. L. Shaji Scribes copied the texts and prepared the index of verses. I gladly acknowledge my indebtedness to these officers for their co-operation and help.

Finally I thank the Vijnanabhavan Printers for their whole-hearted involvement in getting the work printed in time.

ORI and Mss Library
24-10-1977. } Dr. K. Raghavan Pillai.

श्री

अतुलकविकृतं

मूषिकवंशमहाकाव्यम्

प्रथमः सर्गः

*... ... ... कृतात्मनो
न नाम कृत्यं कृपणैस्तवासुभिः ।
तथापि भर्तुस्त्वयि तादृशस्थितां
प्रजामिमां न प्रतिहन्तुमर्हसि ॥

तदेतदज्ञातसमुद्भवं जनै-
र्दिगन्तमह्नाय विगाह्य कश्चन ।
समाक्रमिष्यत् क्रमशो धरातलं
समं मया रक्ष शिवं कुलाङ्कुरम् ॥

इति प्रपन्न ... न्निवापदं
प्रजाकृति ... मस्य रक्षितुम् ।
शुचापि राज्ञी हृतचेतसा ग...
... ... जग्राह गिरं गरीयसीम् ॥

मृगीव शार्दूलविपन्नभर्तृका
.... तुरा ।
इयेष राज्ञी जमदग्नि ... ...
पटेन बाष्पाञ्जनदूषितेन सा ॥

* The verses are not numbered in this canto since the text is incomplete in the beginning in all manuscripts.

... ...
क्वचिद् ययौ भूमिपतेः कुटुम्बिनी ।
भये च रक्षां समये च संविधां
... कर्मसंस्कार इव द्विजेश्वरम् ॥

नदाम्भसि ग्राहसहस्रसङ्कुले
वने च सिंहध्वनिधूतहस्तिनि ।
जगाम सा रामभयादशङ्किता
स्फुरन्ति भीतस्य हि नेतरा भियः ॥

चकार यस्याश्चरणा ... ...
... सयात्रां मणिहर्म्यभूमिषु ।
पदं दधौ पर्वतमेखलासु सा
दशानुरूपा ... हि देहिनाम् ॥

पुराणि राष्ट्राणि च वीक्ष्य भूयशो
जहत्यनाथा न समृद्धिमुत्तराम् ।
प्रवृत्तबाष्पाम्बुपरीतलोचना
तथाविधां सा स्वभुवं समस्मरत् ॥

कथञ्चिदाशामपहाय दक्षिणां
हृतामुना नातिचिरान्मनस्विनी ।
पदैरवापद् गुरुगर्भमन्थरैः
पयोधिवेलाश्रयमेलिनं गिरिम् ॥

अनेकमूर्धानमसंख्यगह्वरं
... ... स विवेश ... ।
... ...
... ... ॥

द्विजः पुरस्कृत्य स राजयोषितं
प्रवर्धमानालघुगर्भदुर्भराम् ।
... ... द्धपद्धतिं
गिरिं तमारोढुमथोपचक्रमे ॥

मुहुः कराभ्यामवलम्ब्य वीरुधो
विनिःश्वसन्ती विधुतोद्धतस्तनम् ।
कथञ्चिदुच्चैरबला शिलातलं
शनैरतिक्रम्य जगाम भूभृतः ॥

तटस्थमारुह्य गिरिं स्वतः क्रमात्
... प्रपन्नावथ तौ सरस्वतः ।
गतिं दधानौ गुरुसादविक्षतां
बिलान्तरं रामभयादविक्षताम् ॥

अ ... ... रोज्ज्वले बिले
निवेश्य तामध्वपरिश्रमालसाम् ।
उपाहरन्मूलफलानि सत्वरं
द्विजातिरारादगमद् वनान्तरम् ॥

*ततो हतश्वापदगात्रखण्डकै-
रशून्यविस्राननभीषणाकृतिः ।
गजेन्द्रवर्ष्मा परिगर्ज्य मूषिको
बिलान्तरं तत् सहसा व्यगाहत ॥

ह्रदं मदान्धे करिणीव तद् द्रुतं
विगाहमाने बिलमाखुभर्तरि ।
तरङ्गभिन्ना प्रतिमेव शीतगो-
रनुक्षणं राजवधूरकम्पत ॥

---

* The manuscript 'ग' starts with this portion only.

नदन्नथोच्चैरवलां विलान्तरे
भयातिरेकप्रविलोललोचनाम् ।
विधूय ....
.... हर्तुमियेष मूषिकः ।।

प्रधर्षयन्तं ....
.... ।
परिस्फुरन्तं ग्रसनार्थमात्मन-
स्तनुं सितांशोरिव सिंहिकासुतम् ।।

.... लुठितं रसातले
वधूरथोत्पत्य विलोलिता .... ।
.... चुक्रोश निपीडितामुना
जलावलिर्दुग्धनिधेरिवाद्रिणा ।।

ततस्तदार्तस्वनितोपकर्णना-
दुदग्रहुङ्कारहृताद्रिकुक्षिणा ।
क्षणेन तत्र स्फुरितेक्षणार्चिषा
ससंभ्रमं सन्निदधे पुरोधसा ।।

प्रत्यागते हृदि तदागमनेन तावद्
देव्या(:) प्रदीप्तनयनं सहसोन्मिषन्त्या(:) ।
संरम्भविस्मृतभियो भयदः परेषा-
मक्ष्णः कृशानुरकृशद्युतिरुल्ललास ।।

अह्नाय वह्निरशनिप्रभवो दिवेव
पत्न्या नृपस्य पतिदेवतया विमुक्तः ।
पर्यालुठन्तमवनौ बहुशः सशब्दं
पुप्लोष तं गहनमूषिकमीक्षणाग्निः ।।

5

तावत् स रत्नशिखरोज्ज्वलमौलिबन्धं
 बिभ्रद् वपुर्विततनिर्झरहारगौरम् ।
जुष्टो गणैः परिजनैर्वनदेवताना–
 मुच्चैर्बभूव पुरुषाकृतिरद्रिराजः ॥

अधिगतगुरुविस्मयौ ततस्तौ
 प्रविततलोलविलोचन ... ।
... ...
 ... ... धीरमाबभाषे ॥

अस्योच्च ... ... देवताभं
 जातश्रमा ... ... ।
... ...
 ... ... प्रयान्ति ॥

प्रस्थे ममाद्य कुहचित् पृथुनिर्झराम्भः–
 सम्पातपूतसिकताचितभूमिभागे ।
चक्रे पयोनिधिकृताप्लवनः कदाचिद्
 योगासनं कुशिकगोत्रगुरुर्मुनीन्द्रः ॥

तत्रान्तरे मूषिकवेषधारी
 क्रीडन्नरण्येषु समं रमण्या ।
ध्यानोपविष्टं मदनान्धवृत्तिः
 प्रधर्षयामि स्म महर्षिमेनम् ॥

यस्यैवं वपुरवलम्ब्य धर्षितोऽहं
 तज्जातौ पृथगनया पतिष्यसि त्वम् ।
इत्युग्रं मयि सहसा तदापराद्धे
 कोपान्धो मुनिरथ शापमुत्ससर्ज ॥

सव्रीलसाध्वसजडे मयि सन्निवृत्ते
बध्वां मुनेश्चरणयोर्मुहुरापतन्त्याम् ।
तेन प्रसादमृदुना स्वयमेव शापा-
दस्मादयं निगदितो मम मोक्षकालः ।।

तदा प्रभृत्यहमिह मूषिकाकृति-
र्बिलान्तरे स्वविरचिते बलोद्धतः ।
निपातितैः शरभगजादिभिः स्वयं
प्रवर्तयाम्यनुदिनमात्मनः स्थितिम् ।।

अहमसुलभमोक्षादद्य शापादमुष्मात्
पदमुचितमुपेतो युष्मदभ्यागमेन ।
तदिह वसत यूयं यावदभ्युद्धरामि
क्षितिधर इति सद्यो वाचमुक्त्वा तिरोभूत् ।।

तत्रोग्रा प्रकृतिरुदासि प[...]सत्त्वैः
सम्पेदे मधुररसैश्च शाकमूलैः ।
वैषम्यं गतिषु वसुन्धरा निरासे
भूभर्तुः सुकृतगुरोर्मनःप्रसादात् ।।

अथ चिरमतु(लां ? लाद्)गुरोः प्रसादा-
न्निभृत ... श्च गरीयसः प्रसादात् ।
नृपतिकुलरिपोर्न भार्गवस्य
स्मृतिमगमत् स शिवो नरेन्द्रगर्भः ।।

इत्यतुलकृतौ मूषिकवंशे प्रथमः सर्गः ।

द्वितीयः सर्गः

स्फीतेऽथ रामे प्रलयाम्बुराशौ प्राप्ते लयं सर्वनरेन्द्रलोके ।
प्रासूत देवी तनयं महान्तमाद्येव भूत्यै प्रकृतिः प्रजानाम् ॥१॥

विश्वं विनष्टक्षितिपालमेतत् प्रवृद्धतेजस्युदिते कुमारे ।
निश्शेषमग्नैरुडुभिर्विहीनं नभो नवादित्यमिवाबभासे ॥२॥

प्रसारितेनाञ्जलिसम्पुटेन मात्रा समं वीक्षितुमुह्यमानः ।
मध्ये शयानं वटपल्लवस्य विडम्बयामास शिशुः स शौरिम् ॥३॥

आलोक्य रामं सहसा स्मरन्त्या रामस्य भीमान्यतिसाहसानि ।
कल्याणमस्याः स्फुरितैरजस्रमदक्षिणं लोचनमाचचक्षे ॥४॥

सा बिभ्रती भर्तृविनाशयोगादङ्गैरसोढाभरणैस्तनूजम् ।
आसीत् स्वकालात्ययमुक्तपुष्पा लता निबद्धैकफलोद्गमेव ॥५॥

देव्या यदासीत् कुचमण्डलस्य भङ्गात् प्रियस्पर्शमहोत्सवानाम् ।
शान्ति ययौ शर्मकरेण दैन्यं श्लाघ्येन तत् पुत्रमुखार्पणेन ॥६॥

गम्भीरनादं क्षितिपालसूनुरङ्गानि धून्वन्नसकृद् रुरोद ।
विलम्बनाद् विक्रमकालयुक्तेर्विषण्णचेता इव मातुरङ्के ॥७॥

बालस्वभावात् कलितौ कदाचिन्मुष्टी कराभ्यां न घनौ मुमोच ।
संरक्षणीयां नियमादमोक्तुं सप्तार्णवां हस्तगतामिवोर्वीम् ॥८॥

उ(द्धा ?त्था)तुमिच्छन् द्विगुणावकाण्डे कराववष्टभ्य तलाद्धरण्याः ।
संबुध्यमानाम्बुजकोमलेन वक्त्रेण बालः सुचिरं व्यरोदीत् ॥९॥

उत्सङ्गभूमौ परिवर्तमानमिच्छानुरूपैरसकृद् विहारैः ।
दत्तं कराभ्यां सदयं जनन्या धात्री कुमारं बिभराम्बभूव ॥१०॥

दृष्टो मुहुः सस्पृहया जनन्या क्षणासिकां प्राप्य चलाग्रकायः ।
पर्युल्लसत्कोमलपल्लवाभ्यां भूयः कराभ्यां भुवमाललम्बे ॥११॥

प्रत्यग्रदन्ताङ्कुररश्मिराजिपरीतदन्तच्छदपल्लवेन ।
मुखेन मोघस्मितभूषणेन चेतः स मातुर्विवशीचकार ॥१२॥

दन्तप्रभापङ्क्तिरमुष्य दीप्रा स्तनाभिलाषस्फुरिताधरस्य ।
अभूषयत् प्रोषितहारबन्धं कुचद्वयं भूमिभुजो महिष्याः ॥१३॥

स प्रस्नुतानि स्वगुणानुरागान्मृदुप्रयुक्तेन करग्रहेण ।
पयांसि जग्राह शनैर्जनन्याः पश्चाद् वसूनीव वसुन्धरायाः ॥१४॥

पित्रोरुरश्चन्दनरेणुजालैर्युक्तं यदासीद् भवितुं विकीर्णम् ।
तद् रिङ्गणोत्थेन तदीयमङ्गं भूरेणुना धूसरतां प्रपेदे ॥१५॥

आलङ्घ्यलमानं विषयान्तराणि राज्यं समन्तादिव राजसूनोः ।
प्रज्ञाविधेयातिशयं क्रमेण ज्ञानं परामस्य ययौ विवृद्धिम् ॥१६॥

उच्चैर्भुवि प्रस्फुरितान्मणीनां ज्योतिष्प्ररोहानवलम्ब्य भूयः ।
उ(द्धा ?त्था)तुमायस्य चलायताक्षश्चलन् स्वमात्रा द्रुतमाललम्बे ॥१७॥

विभिन्नवर्णानि विभूषणानां स्थानानि संस्पृश्य कुतूहलेन ।
प्रवृद्धबाष्पाकुललोचनान्तं देव्याः कुमारो मुखमाशु चक्रे ॥१८॥

आलम्ब्य राज्ञीमनुकूलवृत्ति बाल्यात् पदान्याकुलितं चकार ।
आश्रित्य देवीं वचसामविद्वान् कविः स्वकाव्येष्विव भूतलेषु ॥१९॥

अर्धोदितैर्मुग्धविलासमिश्रैरासिच्यमानैरमृताम्भसेव ।
कर्णौ कुमारः स कलप्रलापैः सन्तर्पयामास भृशं सवित्र्याः ॥२०॥

क्रमेण बालः स्थिरकोमलेन क्रीडागतिख्यापितपौरुषेण ।
अङ्गेन पङ्केरुहलोचनेन शोकं जनन्याः शिथिलीचकार ॥२१॥

नगेन्द्रपुण्याश्रमवासिभिश्च सार्धं मुनिन्द्रैः समयान्तरेषु ।
नरेन्द्रसूनोर्विधिवद् द्विजेन्द्रः संस्कारकर्माणि समाचचार ।।२२।।

सर्वासु च क्षत्त्रकुलोचितासु संवित्सु धर्मार्थनिबन्धनासु ।
मेधाविनं नातिचिरात् कुमारं प्रीतो गुरुर्ज्ञातगुणं व्यनैषीत् ।।२३।।

तावच्च निःक्षत्त्रमदं समन्तात् त्रिःसप्तकृत्वो भुवनं विधाय ।
कोपाग्निरुच्चैर्जमदग्निसूनोश्चिरात् स्वयं चेतसि निर्ववार ।।२४।।

आक्रन्दितेषु क्षितिपाङ्गनानां समन्ततः सन्ततमुत्थितेषु ।
कृपाथ गुर्वी कृतकृत्यकोपं पस्पर्श चेतो भृगुनन्दनस्य ।।२५।।

स पार्थिवासृक्सलिलह्रदेषु कृत्वा निवापानुचितान् पितृभ्यः ।
आस्राम्बुसिन्धुष्वरिसुन्दरीणां प्रक्षालयामास कुठारधाराम् ।।२६।।

तीव्रैस्तपोभिः क्रतुभिश्च पुण्यैरपोहितुं क्षत्त्रवधोत्थमेनः ।
उत्सृज्य राज्यं जमदग्निसूनुस्तमेव पृथ्वीधरमाससाद ।।२७।।

ततो वसिष्ठप्रमुखैर्नगेऽस्मिन्नृत्विग्भिराम्नायधनैर्मुनीन्द्रैः ।
यथोक्तया दक्षिणया स रामश्चिरं क्रतून् सन्ततमाजहार ।।२८।।

प्रवर्तमानेषु मखेष्वथैवं क्वचित् प्रयोगे किल तस्य राज्ञा ।
क्षत्त्रान्ववाये कृतसंभवेन कृत्यं कुमारेण बभूव किञ्चित् ।।२९।।

तावत् कुमारं व्यसनादपारादुदन्वतो लोकमिवोद्धरिष्यन् ।
वराहरूपी भगवानिवोच्चैरैलीगिरिः कालविदाविरासीत् ।।३०।।

कश्चित् कुमारः शशिवंशजन्मा संवर्धितो मातृपुरोहिताभ्याम् ।
त्वत्तो भयादस्ति बिलान्तवासीत्यथैनमद्रिः प्रणतो बभाषे ।।३१।।

प्रीतेन रामेण कृताभ्यनुज्ञः प्रणीतचेता धरणीधरेन्द्रः ।
सार्धं स पूज्येन पुरोहितेन भव्यं कुमारं त्वरयोपनिन्ये ।।३२।।

प्रणम्य वह्नीन् स वितानभाजो रामं सदस्यांश्च पुरः समेतान् ।
गुरुप्रदिष्टेन पथा प्रविष्टो जहार चेतांसि समं जनस्य ॥३३॥

स्वाकारसंसूचितवीर्यसारं विलोक्य चैनं विनयावनम्रम् ।
पुंसि प्रजातन्त्रभरैकधुर्ये चिन्तां स रामः शिथिलीचकार ॥३४॥

ततः क्रियान्ते परितुष्टचेता महीभृतोच्चैरमुना सनाथे ।
तदाख्यया लक्षितनाम्नि पश्चाद् राज्ये स राजानममुं चकार ॥३५॥

बिलेऽभवद् येन स मूषिकस्य रामाच्च यः प्राप घटाभिषेकम् ।
बभूव तेनास्य जगत्प्रकाशं समूषिकं रामघटाभिधानम् ॥३६॥

ज्योत्स्नामिवेन्दुर्जगतोऽभिरामां विद्यामवन्ध्यामिव वीतरागः ।
लक्ष्मीमुदारां क्षितिपालसूनुः कवीश्वरः कीर्तिमिवाससाद ॥३७॥

श्वेतातपत्रोचितया कुमारं दृष्ट्वोपगूढं नवराजलक्ष्म्या ।
क्लेशस्य भूयः फलमाप राज्ञी वैधव्यवन्ध्यस्य च जीवितस्य ॥३८॥

उपात्तराज्यं जमदग्निसूनोरग्नेरिवादित्यमवाप्तदीप्तिम् ।
स्फीतानुरागा प्रकृतिः स्वकीया नवोदयं तं क्रमशः प्रपेदे ॥३९॥

प्रयाति नीहार इवोपशान्ति पत्या भृगूणां मथितावशिष्टैः ।
पुनः शनैर्व्यानशिरे नरेन्द्रैः सरांसि पद्मैरिव मण्डलानि ॥४०॥

माहिष्मतीयो मतिमान् कुलीनः श्रेष्ठी महानाविकनामधेयः ।
मन्त्री महीयान् क्षितिभर्तुरस्य वाचस्पतिर्वृत्ररिपोरिवासीत् ॥४१॥

राष्ट्रे स तत्र स्वगुणानुरक्ते शोभावतीमाहितगुप्तियोगाम् ।
चक्रे गुरुर्मूषिकभूपतीनां कोलाभिधानां कुलराजधानीम् ॥४२॥

वस्वौकसारामिव वासवस्तां फणावतां भोगवतीमिवेन्द्रः ।
ऋद्धामधिष्ठाय पुरीं स राजा प्रजाः प्रजानन्दकरः शशास ॥४३॥

विशोध्य तद् राज्यमयोध्यमन्यैः समग्रशक्तिः समुदग्रचेताः ।
इयेष जेतुं स विशेषवीरो विशां पतिर्जातु दिशां मुखानि ।। ४४।

निरस्तकम्पाथ तनूकृताम्बुः शरद् विविक्ताखिलदिग्विभागा ।
भावावबोधादिव तस्य राज्ञः प्रस्थानयोग्यां पृथिवीं चकार ।।४५।।

सुदुष्करं पुष्करलोचनाभः कर्मेदमारब्धुमना जनेन्द्रः ।
प्रदक्षिणीकृत्य जिगीषुरैच्छत् स राममामन्त्रयितुं सशैलम् ।।४६।।

ततः स निश्शेषदिगन्तरालनिलीनराजन्यकविग्रहाय ।
अरण्यनागोन्मथनाभिलाषी बलोद्धतः सिंह इवोच्चचाल ।।४७।।

आकर्ण्यमानश्च्युतकर्णतालं तस्याथ गोत्राचलकुञ्जरेन्द्रैः ।
पर्जन्यकालस्तनयित्नुधीरः प्रस्थानतूर्यध्वनिरुल्ललास ।।४८।।

अधिष्ठितस्तेन रथः प्रथीयान् कार्तस्वरो भास्वरदर्शनेन ।
सहस्रधाम्ना स्फुरताधिरूढश्चलाचलो मेरुरिवावभासे ।।४९।।

पिशङ्गितं मौलिमणिप्रभाभिस्तस्योन्नकैरुज्ज्वलमातपत्रम् ।
विडम्बयामास दिनावसानसन्ध्यारुणं पार्वणमिन्दुबिम्बम् ।। ५०।।

परिस्फुरच्चामरमध्यवर्ती नृपः स नीलोत्पलतुल्यकान्तिः ।
चलद्बलाकाकुलपार्श्वभूमेर्नवाम्बुवाहस्य ययावभिख्याम् ।।५१।।

तावद् रजोरुद्धदिगन्तरिक्षं गम्भीरभेरीतुमुलं चचाल ।
कल्पक्षयोद्वे(ग? ल)इवाम्बुराशिर्बलोदयः शासितुरुर्वरायाः ।।५२।।

समुत्थितः सप्तिखुराभिघातात् काष्ठामशेषां कवलीचकार।
सम्प्रस्थितस्यास्य चमूपरागः प्रतापवह्नेरिव धूममोक्षः ५३।।

आराधितः पौरविलासिनीनां नेत्रालिशारैर्नवलाजपुष्पैः ।
बलौघसंरुद्धनरेन्द्रमार्गं शनैर्नृपस्तां पुरमत्ययासीत् ।।५४।।

वातावधूतैः स दलाग्रहस्तैरालम्बनं किञ्चिदिवाप्तुकामाः[1] ।
फलातिभारग्लपिता नरेन्द्रः कोलोपशल्ये कदलीरपश्यत् ॥५५॥

स नालिकेरीवनपूग(म?ष)ण्डप्रसून[2]सूचीपुटभेदगन्धैः ।
वातोपनीतैः सहसा निकामं ग्रामेषु रेमे पतिरुर्वरायाः५६॥

स्त्रीणां लतापुष्पमधुव्रतौघैश्छिद्रेष्वतिश्यामरुचां वृतीनाम् ।
वक्त्राणि जग्मुर्बलदर्शिनीनां मेघान्तरालक्ष्यमृगाङ्कशोभाम् ॥५७॥

व्यालोलपुष्पस्तबकाः समन्ताद् दृशोऽहरन्निक्षुलताश्रमूनाम् ।
इतस्ततः श्रेण्य इवोल्लसन्त्यः शरा(ल)यश्चामरवाहिनीनाम् ॥५८॥

होमाग्निधूमैर्धृतहव्यगन्धैः पवित्रिताशेषदिगन्तरिक्षान् ।
ग्रामानतिक्रम्य ततो द्विजानां सस्योत्तरीयां भुवमाससाद ॥५९॥

पतत्रपातोपचितः शुकानां वाचालितः शालिविघट्टनेन ।
विनिद्रपद्मोत्पलगन्धवाही वप्रानिलस्तं शिशिरः सिषेवे ॥६०॥

स शालिगोपीजनगीयमानं विशालमाकर्ण्य यशः स्वकीयम् ।
लज्जानतास्यो रमणीजनस्य निश्शङ्कदृश्यो नृपतिर्बभूव ॥६१॥

महोत्पलान्मत्स्यविधूतदण्डाद् भ्रष्टं नृपो भृङ्गकुलं विलोक्य ।
सस्मार वीरः परघर्षणेन राज्यात् परिभ्रष्टमरातिलोकम् ॥६२॥

परिच्युतैः केतकमञ्जरीणां रजोभिराम्रेडितसैकतान्तम् ।
सौगन्धिकोद्गन्धिसमीरणार्द्रं स सागरानूपमुपाससाद ॥६३॥

---

1. 'दवा' ग. 2. 'सुना' ख

कल्लोलभङ्गस्खलितोद्यमेन समुद्रवातेन तरङ्गितानि ।
एलानुबद्धानि ययुर्ध्वजिन्यो वेलातमालद्रुमकाननानि ॥६४॥

भूयः परिष्वज्य महोर्मिहस्तैराकृष्यमाणामिव सागरेण ।
बद्धैः ससैन्यो......मार्गैः किळ्ळां ततो भूपतिरुत्ततार ॥६५॥

उत्तानवीचीरयभग्नशुक्तिविकीर्णमुक्ताचितसैकतेन ।
वेलापथेनाम्बुनिधेः स गत्वा शैलं शनैरेलिनमाससाद ॥६६॥

अवेक्ष्य तं प्रभवमुदारमात्मनो
दुरुद्वहप्रमदभरेण चेतसा ।
उपस्थितं पितरमिव स्वयं पुन-
र्धराभृतं क्षितिपतिरभ्यवन्दत ॥६७॥

अध्यासितो भृगुसुतेन समं बलौघै-
स्तेन प्रदक्षिणमसावचलः परीत्य ।
जुष्टः शिवेन सह देवचमूसमाजैः[1]
कैलासशैल इव काश्यपनन्दनेन ॥६८॥

इत्यतुलकृतौ मूषकवंशे द्वितीयः सर्गः ।

तृतीयः सर्गः

अथ समुच्चशिलाशिखरं शनैरधिरुरोह स रामदिदृक्षया ।
परिवृतं निवहेन पतत्रिणां धरवरं स्वरञ्जितचेतसा ॥१॥

मणितलप्रतिबिम्बितपादपाः शुभनिकुञ्जकृतस्वनकिन्नराः ।
मुमुदिरे समवेक्ष्य मुहुर्जना वनततीर्वनतीर्थसुखापगाः[2] ॥२॥

1. 'चमूहैः' ख. 2. 'तीर्थवती' ख.

मणिशिलाशयितस्य फणावतः[1] प्रकृतिजेन पुरः श्वसितोष्मणा ।
स्फुटमदृश्यत शोषमुपेयुषी वनलताऽनलतापवशादिव ।।३।।

अविषमं विषमेषु कृतादरैर्गिरितटेषु गतं नृभिरैक्ष्यत ।
हयवरस्य दिवं क्षितिरेणुभिस्तिरयतो रयतोषितसादिनः ।।४।।

प्रचलसैन्यतुरङ्गखुरोद्गताः[2] स्फटिकवर्त्मसु या रजसां घटाः ।
पवनधूतदवाग्निसमुद्भवां नभसि ता भसितावलिमन्वयुः ।।५।।

बलमतङ्गजगण्डतलस्पृशि प्रचलिते मदगन्धिनि मारुते ।
धृतरुषो दशनैर्द्रुतमारुजन् वनगजा नगजालकमग्रतः ।।६।।

जरठतिग्ममरीचिकरोत्करज्वलितदीप्तिषु हाटकभूमिषु ।
बलगजेन भृशं क्षुभितात्मना स्यदवता दवता न भयं दधे ।।७।।

पथि घनस्वनमत्तमयूरया प्रचलिताचलया[3] गतिलीलया ।
प्रययुरम्बररोधिवृहद्रजःप्रसरया सरया रथपङ्क्तयः ।।८।।

सुरभिपुष्परजोभरधूसरः स्खलित[4]निर्झरशीकरशीतलः ।
धृतिकरः श्वसनो धरणीभृतां श्रमवतामवतानमरीरमत् ।।९।।

बलरवक्षुभितेषु पतत्रिणामपसरत्सु कुलेष्वलिमण्डलैः ।
विगतविप्लवमम्बुरुहां तृषः शमकरं मकरन्दमपीयत ।।१०।।

क्षितिभृता स्वसमूहविनिश्वरत्पवननन्दितपार्थिवयामुना ।
स्फुटतरं हरिचन्दनसम्पदा विमलया मलयाद्रिरजीयत ।।११।।

प्रियकरैरवलम्बितपाणयो वनसमृद्धिविलोभितदृष्टयः ।
क्षितिभृतो विषमे कटकान्तरे शललिते ललितेन ययुः स्त्रियः ।।१२।।

---

1. 'परस्वतः' क, ग. 'परश्वतः' ख. 2, रोद्धताः' ख. 3. 'प्रदलि' ख.
4. 'स्थगित' ख.

क्षुभितनीडगृहान्तरनिर्गता गगनमेत्य शुचेव विचुक्रुशुः ।
द्विपवरे विहगाः स्वकमाश्रयं मदवशादवशातयति द्रुमम् ।।१३।।

प्रतिगजस्मृतिभिन्नमहाशिलं बलगजा ददृशुर्वनकुञ्जरम् ।
प्रचुरदानविसर्गपरिश्रमात् कृशबलं शबलं गिरिधातुभिः ।।१४।।

पृतनया नृपतेरुपशुश्रुवे शिथिलवल्कलमर्मरनिस्वनः ।
प्रविधुते परितो गिरिकाननं भुजवने जवनेन नभस्वता ।।१५।।

निकषिते निकटद्रुमशाखया पवनपातवशाद् वनपादपे ।
जनितसप्तरुचिर्ध्वजिनीजनैररणिता रणितात्मनि सस्मरे ।।१६।।

कुसुमपल्लवगन्धरसोन्मदभ्रमरकोकिलवन्दिरवोज्ज्वलः ।
युवजनं वनभूमिषु मन्मथो भृशरसं शरसन्धिभिरक्षिणोत् ।।१७।।

बलरवक्षुभिता जयदन्तिनां भरितभूरिगुहागृहकोटरैः ।
प्रतिभयैः स्म रवैः कटनिर्झरं मदमयं दमयन्ति मृगारयः ।।१८।।

युवतिहंसकनादसमुत्सुकश्चटुलपक्षधुताम्बुजषट्पदः ।
सरति हंसगणो मुखनिर्गलद्बिसकलः सकलस्वनमुच्चयौ ।।१९।।

प्रचलपल्लवजालसमाकुलः सरसवृक्षलताकुसुमोद्गमः ।
परिमलैरहरन्मधुपायिनां मदयिता दयिता धरणीभृताम् ।।२०।।

पृथुलसैन्यरवोदितसाध्वसा भयनिरस्तपरस्परनिग्रहा ।
मृदितकच्छलता मृगसंहतिः सहरिणा हरिणा सह चुक्षुभे ।।२१।।

अथापरेषां विजयाय भूभृतां
स्वयं दिवं भर्तुमिवाधिकोन्नतम् ।
निरीक्ष्य तं शैलमुपात्तविस्मयं
धरापतिं सारथिरित्यवोचत ।।२२।।

व्याप्तो नेत्रशतैर्नितान्तललितैर्दिग्वारणव्यापृत-
श्चेतोहारिशुभाप्सरोगणवृतः सेव्यो मरुद्भिः शिवैः -
वज्रोद्भासितविग्रहास्तसकलक्षोणीधराभ्युन्नतिः
पत्युर्देव! दिवौकसामयमसौ कक्ष्यां गिरिर्गाहते ॥२३॥

को हि रत्नतटगौरवपुष्टः
पर्वतात् तुहिनगौरवपुष्टः ।
साम्यमस्य लभतामहिमान्यः
स्निग्धचन्दनलतामहिमाऽन्यः ॥२४॥

मेघैराकीर्णः प्रावृषेण्यैः समन्ताद् वेलामालीनो भर्त्सयत्येष शैलः ।
पङ्कैः पातालादुद्धृतैराचिताङ्गं वारामुत्तीर्णं पत्युराद्यं वराहम् ॥२५॥

वृत्रारिवज्रमुखपातभयेन शश्व--
दन्तर्जले निवसतामवनीधराणाम् ।
वन्येभबृंहितरवैः स्वदरीमुखोत्थैः
पृच्छन्निवार्णवमनामयमेष भाति ॥२६॥

अयं गुरुतरस्तरस्विगवय्योऽवलोक्य नमतो मतोऽस्य जगतः ।
गतः पृथुलतां लताश्चितनगो न गोपितनभा न भाति शिरसा ॥२७॥

स्फटिकोपलेषु विषमेषु वेगादिह
प्रतिमामवेक्ष्य चरतो नवाम्भोमुचः ।
प्रपतन्महाशितिशिलाभिशङ्काभृतः
सहसा भियं दधति मुग्धसिद्धाङ्गनाः ॥२८॥

पर्यासितास्तटशिलाकुहरेष्वपांनिधे-
र्वेलाजलैः कृतनिवृत्तिषु वीचिषु क्षणात् ।
संसर्पणेषु विषमेषु मिथो विघट्टिताः
काष्ठां वहन्ति करिणामिव शङ्खशुक्तयः ॥२९॥

शिशिरस्थलं किसलयाशिशिरः समयेऽपि शुक्रशुचिमासमये ।
नदवान् दधद् वनमसौ न दवान् सह तेजसा दिनकृतः सहते ।।३०।।

पुष्परजोवितानसुरभिः स्वनदलिकलिलः
पल्लवकम्पसूचितमृदुप्रचलनसुभगः ।
निर्झरवारिबिन्दुकणिकापरिचयशिशिरः
सिद्धवधूरतश्रममिह श्लथयति पवनः ।।३१।।

पादानमुष्य जलधिर्मणिभिः प्रकीर्णै-
रुन्मेषवद्भिरुडुभिः क्षणदा शिरांसि ।
मध्यं नखाग्रदलितद्विपकुम्भमुक्तै-
र्मुक्ताफलैर्मृगरिपुस्तरलीकरोति ।।३२।।

इह निर्झरस्वनधरा न धराः
श्रयितुं न भासुरमणी रमणी ।
प्रसरद्विहङ्गमरुता मरुता-
मकृशद्रुमोच्चयतते यतते ।।३३।।

इह वीक्ष्य नीलमणिरश्मिभिन्नोदरं
शरदम्बुदं सजलमेघशङ्कावहम् ।
परिनृत्यति प्रततमुक्तकेकः शिखी
स्मृतमानसो वहति राजहंसः शुचम् ।।३४।।

एतस्मिन् प्रतितनुमात्मनः समन्ता-
दुद्वीक्ष्य[1] स्फटिकशिलागृहोदरेषु ।
सम्प्राप्ताः सपदि सखीर्विशङ्क्य बालां
लज्जन्तीमिव हसति प्रियो रतान्ते ।।३५।।

---

1. विलोक्य बा'–क, ख

करिणीजनस्य सुमहानिनदे[1] पुरतः कृतोच्चतटहानिंनदे ।
इह दन्तिनि प्रसभमाजिहते विजयद्विपाः समदमाजिहते ॥३६॥

माहानीले स्फटिकमये चासीना–
स्तीरे सिन्धोः स्थगितरुचस्तद्भाभिः ।
कादम्बानामिह कलहंसाश्छायां
हंसच्छायामभिजिहते कादम्बाः ॥३७॥

पुनरपि परिशिष्टं सारमुद्धर्तुमारात्
समुपगतमिवैनं मन्दरं मन्यमानः ।
पतति मुहुरुदन्वानस्य पादोपकण्ठे
मणिनिचयमुदस्यन्नुद्धतैरूर्मिहस्तैः ॥३८॥

विषहतेऽपि न चन्दनपादपे विषहते वसतिं सुखमुज्झितुम् ।
बहुलतापकृतार्तिरिहोल्लसद्बहुलतावलये फणिनां गणः ॥३९॥

वीजत्यग्रे मत्तगजेन्द्रस्मृतिहेता–
वेलागन्धग्राहिणि वेलापवमाने ।
भूयो वक्त्रं धूतसटाग्रं प्रविधूय
व्याजृम्भन्ते गर्जितवन्तो मृगनाथाः ॥४०॥

प्रतिमापतितान् मणिस्थलेषु
प्रविलोक्याम्बुनिधेरिहोर्मिभङ्गान् ।
सभयं वनदेवता वहन्ति
प्रलयोद्वृत्तमहार्णवातिशङ्काम् ॥४१॥

---

1. 'हान्निनादे' ग.

अरण्यसत्त्वैर्यमिनः समक्षया स्वकाष्ठयैव श्रुतिभिः समक्षया ।
निरुध्य वृत्तिं मनसोऽसमञ्जसामिहैकमिच्छन्ति पुमांसमञ्जसा ॥४२॥

ज्योतिर्वृत्तं विपुलमतिविगाह्यावेगा-
न्माहानीलं बहुलतिमिरपूगच्छायम् ।
प्राप्तं मत्वा रजनिमुखममुत्रानूरुः
प्रत्यायच्छत्यहिमकररथाश्वाभीशून् ॥४३॥

अभिभवितुमशेषं लोकमुज्जृम्भमाणं
जलनिधिमिव भूत्यै रोद्धुकामः प्रजानाम् ।
उपहिततटभेदानूर्मिभङ्गान् प्रतीच्छ-
न्नविरतमधितिष्ठत्येष वेलातटान्तम् ॥४४॥

अयमलिखचिताः सिन्धुतोयोचिताः
कुसुमबहुलताश्रान्तनानालताः ।
प्रचलकिसलयास्तुष्टनाकालया
वहति जितभुवस्स्वर्गदेशा भुवः ॥४५॥

उत्थितेनाह्नि ब्रध्नकान्तार्चिषा
शोषमत्र व्रजन्त्यापगानां गणाः ।
स्यन्दिना नित्यशश्चन्द्रकान्ताम्भसा
नक्तमि(च्छ? ष्य)न्त्यथो वृद्धिमिन्दोः करैः ॥४६॥

वेलाविजृम्भणविधौ मुहुरम्बुराशे-
रुत्सृष्टमूर्मिवलयेन समुद्धतेन ।
अभ्राद् घनान्तधवलादमृतांशुशुभ्राद्
व्यक्तिं व्रजत्यकृशमत्र न फेनपुञ्जम् ॥४७॥

20

कमलमतिविकासमुद्रजः सततगतिर्विधुवन् समुद्रजः ।
चलयति कलभृङ्गमानितस्तटतरुनीडविहङ्गमानितः ।।४८।।

पृथुतटपतितानां शीकरैर्निर्झराणां
खचितसकलमूलस्कन्धशाखापलाशाः ।
हिमसलिलकणौघैरह्नि तीव्रातपेऽपि
1 प्रततमिव परीताः शाखिनोऽमुत्र भान्ति ।।४९।।

मायूरं कबलिततीव्रकोपसर्पं
निध्याय व्रजमिह नीचकोपसर्पन् ।
मालेयात् फणिनिवहश्च्युतो भियाति–
क्षोभिण्या कुहरमितस्ततोऽभियाति ।।५०।।

स्कन्धान्तरेषु मरुतां विहिताग्रपादो
वेलातटे कृतपदः शिरसोन्नतेन ।
संलक्ष्यते सततमुल्लसितायताक्षः
पश्यन्निवैष परमावधिमम्बुराशेः ।।५१।।

पक्तिः स्फटिकोपलक्षितौ तपनेन्दू समयोपलक्षितौ ।
कुरुतस्तिमिरोच्चयाविलं प्रलयेऽपि स्फुटमुच्चया विलम् ।।५२।।

नीवारैरिह विहितविपाकपिङ्गैः
सन्ध्यांशुप्रकरपिशङ्गदीर्घशूकैः ।
सज्वाले दवदहने निवद्धशङ्कः
कासारं परिहरति व्रजः खगानाम् ।।५३।।

---

1 'व्रत' —क

चलकेसरं समभिसृज्य जवा–
दिहं निर्जिताखिलमहाचलके ।
मिषतां स्वयूथकरिणां मृगभि–
न्नयति क्षणेन गजमामिषताम् ॥५४॥

अम्बुधा(वु ? व)परिनिष्ठितोन्नतेर्बिम्बमस्य विलसत्यधोमुखम् ।
अच्छतां[1] वहति वारिणि स्फुटं लक्ष्यरूपमिव मूलमादितः ॥५५॥

इह विगाह्य लसत्कुमुदं सरः
सुखगतीरजनीपवनोदयम् ।
परितपत्यधिकं पथिकाङ्गनाः
सुखगती रजनीपवनोऽदयम् ॥५६॥

पुरैव गुरुभिर्गुणैर्बहुमतोऽपि सम्प्रत्ययं
जनस्य सुतरामिह (प्रभवि?[2]व्रजति) मानसं प्रत्ययम् ।
तवाखिलजगत्प्रभोरवनिभर्तुरा जन्मनः
सतामुदयभूमयो ननु हरन्ति राजन्! मनः ॥५७॥

इति कथयति तत्र सारथौ क्षितिपतिरद्रिपतेः कृतादरः ।
बहुलगहनवारितातपं शिखरसनीडमुपाससाद सः ॥५८॥

प्रौढप्रतापविधुरीकृतविश्वलोके
मध्यं व्रजत्यहिमरोचिषि वासरस्य ।
सानुस्थलीषु शिशिरास्वथ शैलभर्तुः
प्रावर्तयन्नरपतिः पृतनानिवेशम् ॥५९॥

---

1. 'अर्चितां' ख. 2. 'व्रताभिमा' ग.

26

जामदग्न्यजनितादुपप्लवादद्य भूतलमरूढराजकम् ।
विक्रमेण चरता विशृङ्खलं स क्रमेण कबलीकरिष्यति ॥२९॥

श्वात्रव:[1] स्वयमुपेक्षितोत्सवं भूपतिं प्रबलमाक्रमिष्यति ।
अन्धकार इव कृष्णपक्षभूः क्षीयमाणमनिदाघदीधितिम् ॥३०॥

प्रायशः कबलिते सुवर्मणि ग्रस्तमेव सकलं मया जगत् ।
लङ्घिताखिलदिशि स्वतेजसा राहुणा दिनमिवाहिमद्युतौ ॥३१॥

उद्यमेन गुरुणा त्वशङ्कितं क्षत्त्वमेतदखिलं समन्ततः ।
सम्प्रयाति विविधैरुपक्रमैर्गूढवृत्तमधुना विपक्षताम् ॥३२॥

सर्वतः क्षितिभृतां विरोधतस्तस्य हि व्यसनमुत्थितं महत् ।
जामदग्न्यविहितास्त्रशक्तिना तन्मया स नियतं विजेष्यते ॥३३॥

तद् विपक्षमपहत्य मागधं तद्गतामपहरन् नृपश्रियम् ।
मण्डलान्यथ पराणि सर्वतः क्ष्माभुजां मम भुजो हरिष्यति ॥३४॥

तर्क एप हृदि मे समुत्थितो निर्णयो ननु भवत्सु तिष्ठति ।
ज्यानिकाषकिणवेणिकर्कशौ विक्रमेष्वधिकृतौ भुजौ मम ॥३५॥

इत्युदीर्य वचनं व्यवस्थिते रोषरूषितमतौ नराधिपे ।
उत्तमोऽथ विनयेन मन्त्रिणां नाविको वचनमित्यभाषत ॥३६॥

दण्डनीतिदमितान्तरात्मनां बिभ्रतां नयपथेषु संस्तवम् ।
भूभृतां हि सचिवा भवादृशां चामरादिसदृशः परिच्छदः ॥३७॥

शौर्ययोगचतुरेण चेतसा बिभ्रतान्तरभिमानमूर्जितम् ।
अभ्यधायि महतो नरेश्वर! स्वाश्रयस्य सदृशं त्वया वचः ॥३८॥

---

1 त्सवः –क

देहजः प्रथममेव दुर्जयो जीयते रिपुगणो जिगीषुणा ।
निर्जितेषु न हि तेषु निर्जिता बाणसाध्यनिधना बहिर्द्विषः ॥३९॥

कृत्यवर्त्मसु कृताभियोगया विद्यया चिरविनीतचेतसः ।
उत्थितौ सह गणेन सन्ततं जिष्णवो जहति रागमत्सरौ ॥४०॥

रुन्धता व्यसनपारिपन्थिकान्प्रमादनिहितेन[1] चेतसा ।
उत्तमं पदमुपैतुमिच्छता नीतिवर्त्म निपुणेन लङ्घ्यते ॥४१॥

जन्मना क्षितिवशेन कर्मभिर्विद्विषोऽथ सुहृदस्त्रिधा गतिः ।
प्राकृताश्च सहजाश्च तावुभौ कीर्तयन्ति बलिनौ तु कृत्रिमौ ॥४२॥

उत्थितस्य विविधैरुपक्रमैर्विश्वलोकविजये त्वयाधुना ।
भूभृतो जगति चारचक्षुषः सर्व एव ननु विद्विषः कृताः ॥४३॥

त्वत्प्रवृत्तिमधिगम्य च स्फुटं दक्षिणापथभुवो नरेश्वराः ।
उत्थिताखिलविरोधमासते साम्प्रतं किल मिथः समागताः ॥४४॥

उत्थितस्य नृपतेरनुत्थिताः सम्भवन्ति रिपवोऽपि बन्धवः ।
स्तम्भयेत् स निजमित्रविग्रहैः सन्धिनाथ शमयेदिमं जनम् ॥४५॥

तत्र नातिमहताप्यनन्तरैर्विग्रहेषु विभवेन शत्रुभिः ।
रक्षितुं नृपतिना हि शक्यते विद्विषामभिभयात् स्वमण्डलम् ॥४६॥

तत् क्रमेण नृपतीननन्तरान् संनिगृह्य जितदक्षिणापथः ।
तद्बलेन सह शात्रवं शनैरिद्धशक्तिरनघस्त्वमेष्यसि ॥४७॥

---

1. 'निभृतेन' ग.

सोऽवतीर्य विनिवर्तिताद् रथात् सन्निवेश्य बहिरानुयात्रिकम् ।
आविशत् सह पुरोधसा शनैर्भार्गवस्य सदनं महीपतिः ॥१०॥

संप्रविश्य पुर एव कर्मणामन्तरे सविनयं पुरोहितः ।
पादमूलगमनक्षणार्थिनं भार्गवाय नृपतिं न्यवेदयत् ॥११॥

पालनेन धरणेरथास्य स प्रीणितोऽनुगतधर्मवर्त्मनः ।
उत्तमस्य नृपतेरुपागमं सद्य एव मुनिरन्वमन्यत ॥१२॥

अग्रतः प्रचलता पुरोधसा भूपतिः सह मुनिं समासदत् ।
पूर्वजेन शनकैर्गरुत्मतो वासरं नव इवाहिमद्युतिः ॥१३॥

जामदग्न्यचरणाम्बुजन्मनोराहिताञ्जलिपुटावतंसकम् ।
भक्तिभारमिव वोढुमक्षमं प्राणमत् सपदि भूपतेः शिरः ॥१४॥

उन्निनाय जमदग्निनन्दनः सन्नतं सपदि मेदिनीपतिम् ।
उत्थितं तमुदये जगत्प्रिये मुग्धचन्द्रमिव वासरात्ययः ॥१५॥

आयुधग्रहकिणाङ्कविप्लवादामृशन्नपरुषेण पाणिना ।
प्रीयमाणहृदयो नरेश्वरं व्याजहार वचनं मुनीश्वरः ॥१६॥

साहसान्मम समुद्रमेखला वत्स भूरियमनाथतां गता ।
राहुरुद्धतपनांशुमण्डला द्यौरिवाद्य समुपैति शोच्यताम् ॥१७॥

प्रस्थितोऽहममुना च वर्त्मना नालमस्मि जगतीमवेक्षितुम् ।
काल एव विधिना त्वमुत्थितः[1] कर्मणीह घटितुं तदर्हसि ॥१८॥

उद्यताखिलमधिष्ठितं त्वया ब्रध्नदीप्तमिव वासरं जगत् ।
गोचरं चरतां समन्ततो नोपसंगंतमसां भविष्यति ॥१९॥

---

1. 'समुत्थित': –ख.

तद् विजित्य कुलशैलकुण्डलां पाहि वीर सकलां वसुन्धराम् ।
पूरयिष्यसि दिशोऽथ कीर्तिभिश्चन्द्रिकाभिरिव पूर्णचन्द्रमाः ॥२०॥

इत्युदीर्य स नृपाय दत्तवानस्त्रजातमजितं च कार्मुकम् ।
सेन्द्रचापमिव धाम वैद्युतं तोयदाय चलते तपात्ययः ॥२१॥

सोऽधिगत्य सकलास्त्रसंविदं राजसूनुरधिकं समाबभौ ।
आवलीमिव वहन्नहस्कृतां दुःसहप्रलयकालवासरः ॥२२॥

चोदितोऽथ जमदग्निसूनुना स प्रणम्य शिरसा तमादरात् ।
आकुलं बलगजेन्द्रबृंहितैः प्रत्यवाप शिबिरं धरापतिः ॥२३॥

शुश्रुवानथ हृताननाथवन्मागधेन स नृपेण हेहयान् ।
कोपदोषकलुषीकृताशयो मन्त्रिभिः सह रहस्यमन्त्रयत् ॥२४॥

भूपतिः स्वसचिवैरशेषतः सर्व एव विषयान् समश्नुते ।
स्वस्थया सह धिया समुत्थितैः पूरुषः पटुभिरिन्द्रियैरिव ॥२५॥

कृत्यवर्त्मविषयेषु[1] केवलं याति नस्तदुभयं प्रमाणताम् ।
[2]शास्त्रमर्थविषयं यदत्र नो यच्च वो मतमनाकुलस्थिति ॥२६॥

या नृपेण विहिता महिष्मता पालिता च गुरुभिर्निरन्तरम् ।
मागधेन किल दूरवर्तिनः सा हृता मम पुरी सुवर्मणा ॥२७॥

स्वे पदेऽपि निभृतो जिगीषतां भूपतिर्ननु रिपुर्धराभृताम् ।
दर्पविस्मृतविशङ्कया धिया किं पुनः स विदधद् विलङ्घनाम्[3] ॥२८॥

1. 'तिनात्त' क, ख. 2, 'कृत्यम'क, ख. 3. 'लम्बनम्' क, 'लङ्घनम्' ख.

सद्य:[1] परिष्कृतजलं जनसन्निवेशैः
क्लृप्तापणं कृतमनोरमवेशवाटम् ।
निर्वृत्तहस्तिहयधाम नगाधिभर्तुः
प्रस्थान्तरं पुरमिवोज्ज्वलमाबभासे ॥६०॥

क्षितिपतिरवरुह्य स्यन्दनात् क्लान्तवांहा–
न्नृपतिभिरवतीर्णैरन्वितो वाहनेभ्यः ।
स्वकुलसमयविद्भिर्वन्दिभिः स्तूयमानः
सुललितमुपकार्यां कल्पितामाससाद ॥६१॥

विश्रान्ताः सह पतिभिर्विलासवत्यो निर्वृत्तस्फुटतरनिर्झराभिषेकाः ।
प्रच्छायेष्ववनिरुहां पृथूपलेषु श्लिष्यन्त्यः सततगतीन् सुखं निषेदुः ॥६२॥

पयसि सरितः संसिक्तानां निबन्धमुपेयुषां
मुखरदशनं कुर्वाणानां मुहुः कबलग्रहम् ।
स्वबलकरिणां हृष्टो वर्गः समं जयवाजिभिः
कटकमतुलं क्षोणीभर्तुर्भृशं तमभूषयत् ॥६३॥

पर्याकुलाखिलवनं शिबिरं जनौघैः
पत्युर्भुवः सदचलो बिभराम्बभूव ।
निःशेषविष्टपशिवस्य निदाघधाम्नो
बिम्बं विसर्पिकिरणौघमिवोदयाद्रिः ॥६४॥

इति श्रीमूषिकवंशे तृतीयः सर्गः

---

1. लस –ख,ग.

चतुर्थः सर्गः

प्रस्थितोऽथ कटकात् प्रथीयसीं संनिपत्य विनयेन सावनीम् ।
जन्मभूमिमिव पुण्यसम्पदामाश्रमं स भृगुभर्तुरासदत् ॥१॥

वेदसागरपथप्रवृत्तिनः प्रापितस्य मुनिमुख्यनैगमैः ।
पुण्यपण्यनिचयस्य यं सदा कीर्तयन्ति मुनयो वणिक्पथम् ॥२॥

भूरिभिर्विरचिता जटाभरैर्यत्र वल्कलपरीतमूर्तयः[1] ।
संमता[2] मुनिगणस्य नित्यशः शाखिनोऽपि न जहुर्मुनिव्रतम् ॥३॥

आन्तरं[3] करणमात्मनोऽपि षड्वर्गदुर्गमभिजेतुमुद्यताः ।
यत्र चोरसि मृगस्य चर्मणा वर्मणेव मुनयो बभासिरे ॥४॥

बिभ्रतो धृतसमिद्भराः क्षमां दण्डिनो विहितमन्त्रसिद्धयः ।
यत्र साधु परलोकजिष्णवो राजवृत्तमृषयोऽनुचक्रिरे ॥५॥

द्वीपिनां मृगगणाः शिखण्डिनां पन्नगाः करिघटा मृगद्विषाम् ।
यत्र जग्मुरपनीतमत्सरा वैभवेन तपसः स्वयूथ्यताम् ॥६॥

सर्वशास्त्रविषयेषु यद्भुवामुत्थिता विमतयस्तपोभृताम् ।
कर्मसु स्फुटमशेषविष्टपव्यापिनीमुपययुर्विकल्पताम् ॥७॥

यत्र जातु जमदग्निजन्मनस्तेजसा त्रिभुवनाभिभाविना ।
अध्वरेषु सकलाश्रमोचितं जायते स्म खलु नासुरं भयम् ॥८॥

ध्यानभाजि यमिनां कदम्बके यत्र च स्तिमितजन्तु काननम् ।
भूधरः सकल एव सोऽन्वहं भीतभीत इव निश्चलो बभौ ॥९॥

---

1. 'वृत्तयः' – क. ग. 2. 'ता द्विजग – ग 3. 'अन्तरं'– ग.

उद्यमेन भवतो गरीयसा विद्विषः शिथिलवीर्यसम्पदः ।
राजते (सति ? जसि) शनैरनाश्रवे न क्रमादुपचयो भविष्यति ॥४८॥

उच्छ्रयस्तव हि कोशदण्डयोरित्यलोल न चिराद् भविष्यति ।
प्रक्रमोऽपि च परस्य तत्क्रमात् स्वैरमेव रिपुमाक्रमिष्यति ॥४९॥

इत्यमुष्य वचनं प्रमाणयन् पूर्णशक्तिरथ शुद्धमण्डलः ।
गुप्तमूलमचलैः समं बलैरभ्ययात् स नृपतीननन्तरान् ॥५०॥

तेन वर्त्म रजसा पतत्रिणां दुन्दुभिध्वनिभिरन्तरं दिशाम् ।
तत्क्षणं बलभरेण मेदिनीं रुन्धता भुवनमन्धकारितम् ॥५१॥

केतुयष्टिलिखिताभ्रशीकरध्वस्तरेणुभिरनुद्रुतो बलैः ।
कैश्चिदेव नृपतिः प्रयाणकैर्विद्विषां भुवमुपाससाद सः ॥५२॥

उच्चचाल पुरतः कुलं द्विषामुत्थिते नृपसितूर्यनिस्वने ।
गर्जति स्फुटतरं घनाघने सिंहयूथमिव शैलकन्दरात् ॥५३॥

भिन्नवाजिगजपत्तिशोणिताप्लाविताखिलमहीतलान्तरम् ।
बाणपूग[1]पिहिताम्बरं ततः संयुगः क्षितिभृतामवर्तत ॥५४॥

शस्त्रजालसलिलौघवाहिनी नागनक्रकलिलास्त्रवाहिनी ।
रूढमूलमपि तिष्ठतः पुरो भङ्गमाशु नयति स्म पार्थिवान् ॥५५॥

उद्यतो दिनपतेरिवाग्रतः स्थातुमस्य रिपुचक्रमक्षमम् ।
अन्धकारमिव गह्वरं गिरेर्दुर्गमाशु शरणं व्यगाहत ॥५६॥

सप्रसारहृतसर्ववीचयः (?) संनिरुध्य सकलं सुहृद्बलम् ।
सेनयाथ बहुमुख्यनाथया दुर्गरोधमकरोत् स विद्विषाम् ॥५७॥

---

1. 'मयूखपि' ख.

आस्थितः प्रतिविधानयन्त्रया[1] यन्त्रजातमपनुद्य सेनया ।
सौप्तिकादि स गणेन रक्षिणां कूटयुद्धमरुणत् समन्ततः ॥५८॥

स क्षणेन तृणपांसुसञ्चयैः संप्रपूर्य परिखाः समन्ततः ।
दन्तिदन्तदलितार्गलं हुलैर्द्वारमाशु नृपतिर्व्यजीघटत् ॥५९॥

भङ्गुरं वपुरुदस्य संयुगे विद्विषोऽस्य दधतः सितं यशः ।
क्षोणिमण्डलमपास्य भेजिरे स्ववंधूबृहदुरोजमण्डलम् ॥६०॥

संप्रधार्य विषयं गुणस्य तं ज्यायसि स्थितविधेर्नयानुगाः ।
केचिदस्य मणिपादपीठिकां पस्पृशुः स्वमकुटाग्रकोटिभिः ॥६१॥

भूतलार्पितदृशोऽभिसंयताः श्वासपातपरितप्तवक्षसः ।
पादशृङ्खलरवैरथापरे बन्धनालयगुहामदिध्वनन् ॥६२॥

संनिरस्य यशसा समं परे राज्यमाशु सकलत्रबान्धवम् ।
शोणितार्द्रमृगभिन्नखावलीमुद्रितं विविशुरद्रिकाननम् ॥६३॥

इत्थमाशु सकलं स निर्जयन् दक्षिणापथनरेन्द्रमण्डलम् ।
पूर्वसिन्धुतटवर्त्मना घनैः शीतलेन तरुभिः शनैर्ययौ ॥६४॥

अथ कबलितभास्वच्चन्द्रतारं सुपूगैः
शिखरमणिरुचीनां शृङ्गशङ्कावहानाम् ।
त्रिभुवनमहनीयं शासनं कुम्भयोने-
र्विदधतमिव वन्ध्यं विन्ध्यशैलं निदध्यौ ॥६५॥

---

1. 'यन्त्रधा' ग.

स्वभ्रूक्षेपवशानुगामिति शनैः कृत्वा दिशं दक्षिणां
दर्पान्धद्विपवाजिभिः परिवृतो वश्यैर्नृपाणां बलैः ।
रेवापङ्कजसौरभप्रणयिना वातेन धूतश्रमं
स्कन्धावारमधत्त विन्ध्यकटकाभोगेष्वसौ भूपतिः ॥६६॥

आकर्ण्य तावदखिलक्षितिलोकजिष्णु-
मुद्योगमप्रतिहतं क्वचिदप्यमुष्य ।
क्लृप्तोत्तरापथनरेन्द्रबलः सुवर्मा
शैलं तमेव नृपतिर्द्रुतमाससाद ॥६७॥

उपगतमभियोक्तुं मागधं ख्यातवीर्यं
शिव इव सुरशत्रुं शुश्रुवान् मूषिकेन्द्रः ।
जनितहृदयतापे मूर्च्छति स्वेऽपि धाम्नि
प्रमदमुपनतेन प्राप युद्धोत्सवेन ॥६८॥

इति मूषकवंशे चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

संप्रधार्य सचिवैः सह कार्यं मूषिकोऽथ बलपौरुषयुक्तः ।
अर्थवेदिनमुपस्थितवाचं मागधाय विससर्ज स दूतम् ॥१॥

सङ्कटाद् गजतुरङ्गघटाभिर्भूभृतः स कटकान्निरगच्छत् ।
ऊर्मिभङ्गकलिलादिव बन्धुः सिन्धुनाथसलिलात् कुमुदिन्याः ॥२॥

प्राप च क्षितिपसैन्यनिवेशैर्मागधस्य कटकं परिवीतम् ।
लोकपालनगरैरुपगूढं सद्म धातुरिव मूर्ध्नि सुमेरोः ॥३॥

तेन चात्र समधिष्ठितवन्तो मन्दुरां[1] नृपतिमन्दिरभाजः ।
हेषितश्रवणभीषितसत्त्वाः सप्तयो ददृशिरे बलदृप्ताः ।।४।।

पादपाकलितनिश्चलदेहान् पीवरोच्चशिरसः स्थिरपादान् ।
पश्यति स्म मदनिर्झरभाजो भूभृतः स पृथुकानिव नागान् ।।५।।

वन्दिवृन्दजयघोषपथानां भूरजःस्थगितभूरिबलानाम् ।
अभ्यपश्यदवनीपतिभाजां भूभृतां पथि गतागतलीलाम् ।।६।।

वाहनेषु विविधेषु स योग्यानायुधेषु च मुहुर्विदधानान् (?)।
व्यायतस्थितमनोरमगात्रांश्चेतसा नृपसुतान् बहुमेने ।।७।।

निर्भरं क्षितिभृतां स चमूभिर्वाहनैरथ परिच्छदजातैः ।
आकुलं नृभिरुपायनहस्तैः प्राप भूपतिसदःप्रतिहारम् ।।८।।

स प्रविश्य विदितोऽथ विनीतः स्वप्रभाहतरुचां नृपतीनाम् ।
मध्यभाजमवनीपमपश्यज्ज्योतिषामिव सहस्रमयूखम् ।।९।।

तं प्रणम्य शिरसाञ्जलिभाजा सत्कृतं भुवि निविष्टमदूरे ।
भासुरस्मितमरीचिपरीतं व्याजहार वचनं मगधेन्द्रः ।।१०।।

बद्धवैरमपि मामकचेतो निघ्नतां नयति यद्गुणराशिः ।
अप्यसौ निजकुलाङ्कुरभूतो मूषिको नरपतिः कुशली ते ।।११।।

त्वद्विधेन सचिवेन नृपाणां केवलं जगति सिध्यति नार्थः ।
ख्यायते मतिगुणश्च महीयानन्तरज्ञ इति तस्य नराणाम् ।।१२।।

प्रेषणेन भवतो मयि राज्ञो मूषिकस्य गुरु कार्यमवैमि ।
प्रायशो लघुषु कर्मसु धीरा ज्यायसो न पुरुषान् घटयन्ति ।।१३।।

1. न्दुर—क.

कथ्यतामभिमतं तदशेषं प्रेषितस्त्वमिह तेन यदर्थम् ।
कृत्यमस्ति न सतामभिनिन्द्यैरर्थिनामसुलभैर्विभवैर्नः ॥१४॥

देहिनां शरणमापतितानामर्थिनामपि सदाभ्युपपत्तौ ।
ईहितानि महतां हि जननां शत्रुमित्रगणनाविमुखानि ॥१५॥

उक्तवन्तमिति मुक्तविकारं गूढवैरविशदेन मुखेन ।
भूपतिं तमथ हेहयभर्तुः प्रत्युवाच विनयेन स दूतः ॥१६॥

भार्गवप्रतिघदावहुताशप्लुष्टभूपगहने भुवनेऽस्मिन् ।
छायया शिशिरयाद्य जनानां पार्थिव त्वमुपकर्तुमुदीर्णः ॥१७॥

पूरितस्य गुणशुभ्रकलाभिश्छिन्दतो रिपुचमूतिमिराणि ।
भूषयत्यखिलमेव दिगन्तं चन्द्रिकेव शशिनस्तव कीर्तिः ॥ १८॥

उच्छ्रिताद् विबिधसंमदहेतोर्बिभ्रतः सुरभितामतिमात्रम् ।
त्वादृशात् सुरतरोरिव किञ्चिद् दुर्लभं प्रणयिनो न जनस्य ॥१९॥

पार्थिवास्तु बलिनः परतन्त्रं प्राणलाभमपि नाभिलषन्ति ।
उन्नताद् गुरुतरादभिमानात् किं पुनः क्षितितलं द्रविणं बा ॥२०॥

तत्र हेहयपतिः स भवत्तः कालयोगगलितं निजमेव ।
पावकादिव रविः करजालं प्रत्यवाप्तुमभिवाञ्छति राज्यम् ॥२१॥

संप्रगृह्य पुरुषो यदि साम्ना स्वार्थमेव परि(गृह्य? विन्द)ति कश्चित् ।
अर्थहानिरहितोऽक्षतमानस्तादृशो न खलु कश्चन लाभः ॥२२॥

संप्रदाय सदपास्तवितर्कं हेहयान् क्षितिप हेहयभर्त्रे ।
ऊढभूरिबलवीर्यमुदारं मूषिकं सुहृदमाशु लभेथाः ॥२३॥

क्षुद्रकस्य विधुरस्य सहायैः कृत्यवर्त्मनि पृथा क........ ।
........रुतरोद्यमभाजां तादृशे सुहृदि सर्वमधीनम् ॥२४॥

नै.........................जिता च तव कापि धरित्री ।
नाहृतं च तव किञ्चन वित्तं मूषिके भृशमुपेयुषि मैत्रीम् ॥२५॥

मित्रतामुपगते तव तस्मिन् दक्षिणा वशमुपेष्यति काष्ठा ।
याति यत्र पतिरेष दिनानां वर्तते ननु ततो दिवसश्रीः ॥२६॥

भारतीं भरसहामिति दूते संनिगृह्य विरतिं प्रतिपन्ने ।
स्मेरवक्त्रकमलो बलगर्वात् प्रत्युवाच वचनं मगधेन्द्रः ॥२७॥

मूषिकस्य गरिमा हृदयस्थः कथ्यते स्फुटतरं वचसा ते ।
तेजसस्तदुदयस्य महिम्ना वक्ष्यते मणिगतो ननु सारः ॥२८॥

हेहयेषु नियमेन यदेषु स्वल्पमिच्छति तदत्र तु वार्तम्[1] ।
द्वीपिनः किमथ वारणभर्तुर्भूधराः किमथ केसरिणो वा ॥२९॥

क्षत्त्रियस्य जननाद् भवति स्वं क्षोणिरेव चतुरर्णवसीमा ।
पालने तु नियमो बलतन्त्रः पूर्वभोगकथयात्र कृतं न ॥३०॥

अर्थनैव परहस्तग(ता?तं)यल्लिप्स्यते स्वमपि किञ्चन साम्ना ।
आश्रिता गतिरियं यशसे च श्रेयसे च न भविष्यति राज्ञाम् ॥३१॥

दुर्बलाश्च घटयन्ति सहायैर्मद्विधाः स्वविभवेन तु कार्यम् ।
दीपितो दहति वायुभिरग्निर्न प्रदीप्तकिरणो हरिदश्वः ॥३२॥

मन्त्रिणो मतिरपोढतमस्का वाहिनी निजभुजस्फुरितासिः ।
पौरुषं स्वमपि यस्य सहायस्तस्य किं परिकरेण परेण ॥३३॥

यः प्रसाधयति गां चतुरन्तां न त्यजेद् भुवमसौ समवाप्ताम् ।
पूर्यमाणतनुको हिमरश्मिः किं कलामधिगतां विजहाति ॥३४॥

1. 'वः' ग.

उक्तवन्तमिति युक्तिमतीं गां भूपतिं तमनपेक्षितसान्त्वम् ।
उद्धतो भुजबलादथ भर्तुः[1] प्रत्युवाच पुनरेव स दूतः ॥३५॥

लक्ष्यते सुलभसम्पदि राजन् नोन्मुखी नयगतौ तव दृष्टिः ।
सन्धिमिच्छति समाश्रयणीये विग्रहं यदि हि वाञ्छसि मोहात् ॥३६॥

पार्थिवस्य नयवर्त्मविलङ्घी विक्रमो न खलु सम्मतिमेति ।
यद्यपि व्रजति सिद्धिमतोऽर्थस्तं घुणाक्षरमुशन्ति नयज्ञाः ॥३७॥

शक्तिरप्रतिहता करिकुम्भे शौर्यमप्यखिलभूतललङ्घि ।
मध्य एव मृगभिन्मतिमोहाद् गण्यते खलु तथापि तिरश्चाम् ॥३८॥

उद्यमे धरणिभर्तुरमुष्मिन् हेहयास्तव न यावदवश्यम् ।
प्रस्फुरन्तमुपलभ्य पतिं स्वं न प्रजा रिपुकुलानि भजन्ते ॥३९॥

भूयसीमपि नरेन्द्र तमोन्धः ध्वंसयिष्यति चमूं समहौजाः ।
एक एव वद किं बलदृप्तः केसरी करिघटां न भिनत्ति ॥४०॥

उत्थिते बलिनि तत्र तवायं भिद्यते जयभृतो नरलोकः ।
कालयोगमभिकाङ्क्ष्य नयज्ञाः संश्रयन्ति बलवन्तमरातिम् ॥४१॥

पीडिता नृपघटा भवतेयं स्वैर्बलैस्तव जयं प्रथयन्ति ।
त्वाममुत्र विषमे घटयित्वा[2] निष्क्रमं समभिवाञ्छति कर्तुम् ॥४२॥

भूपतिस्तदुपजापसमाप्तौ संप्रगृह्य मदपौरुषयुक्तः
आक्रमिष्यति भवन्तमवश्यं दुर्धियो हि सुजया मतिमद्भिः ॥४३॥

---

1. 'पत्युः' ग. 2. ञ्क्रयं–ख.

अप्यमुत्र वचसि प्रतिपन्ने वन्ध्यतां स्थिरमतौ प्रतिपक्षे ।
अभ्यधत्त रभसादथ वाक्यं दक्षिणापथनरेश्वरदूतः[1] ।।४४।।

दारुणं तनुमतां भवितव्यं केवलं प्रतिरुणद्धि न बुद्धिः[2] ।
पश्य पथ्यवचनश्रवणार्थं घट्टयत्यपि बत श्रुतिमार्गम् ।।४५।।

विस्तरेण वचसामिति मोहाद् भेदमेति भुवि यस्य न चेतः ।
भेत्तुमस्य हृदयं ननु सृष्टाः क्षोणिभर्तुरिह बाणसमूहाः ।।४६।।

अन्यपार्थिवगतादनुयानान्[3]नैव तं बलिनमप्यवमंस्थाः ।
विष्फुरन्ति मणयो हि यथामी नैवमेव दहनः प्रबलोष्मा ।।४७।।

आहवेषु कृपया हतशिष्टाः प्रापिता हरिणवृत्तिमरण्ये ।
मूषिकस्य मुषितारिमहिम्नः साक्षिणो भुजबलस्य सपत्नाः ।।४८।।

प्रायशः प्रतिहताखिलसैन्यः संयुगश्रमपरिश्लथगात्रः ।
वीर्यमस्य धृतविप्रतिसारो वेत्स्यसि त्वमपि नातिचिरेण ।।४९।।

उत्तमो नमति सामविधानान्मध्यमो जगति सिध्यति दानैः ।
निष्फलार्थवचसो[4] मतिमोहाद् दण्ड एव दमयिष्यति नीचान् ।।५०।।

त्वद्विधः क्वचिदपि क्षितिभ(र्तुर्ना? र्ता ना)भविष्यदवशो यदि कश्चित् ।
सर्वशस्त्रविशदं बलमस्य व्यर्थमेव भुजयोरभविष्यत् ।।५१।।

जानतापि भवतो मतिमोहं प्रेषितः क्रमविदा प्रभुणाहम् ।
प्रस्खलन्तमपि कुत्रचिदर्थे लङ्घयन्ति न खलु क्रममार्याः ।।५२।।

---

1. 'दूतम्' 2. 'बुद्धिम्' ग. 3. 'नुपाना' ख. 4. 'लाक्षव' ख.

दुर्विलङ्घ्यमतिलङ्घ्य निदेशं न त्वया नरपतेरुपचक्रे[1] ।
उद्धरिष्यति जिगीषुरपि त्वामाश्रवं कथमसावनृशंसः ॥५३॥

कोलभर्तुरिति शंसति दूते भारतीं सदसि वीतविशङ्कम् ।
आतपो रविमणीनिव कोपः पार्थिवान् भृशममूनदिदीप्त् ॥५४॥

अभ्ययुः कलुषतामतिमात्रं दृष्टयः सपदि भूमिपतीनाम् ।
चण्डदूतवचनानिलमुक्तैरापतद्भि(रि? र)तिकोपरजोभिः ॥५५॥

उच्चलत्प्रकुपितौर्वहुताशं क्षुभ्यतां क्षितिपतोयनिधीनाम् ।
वीचिसन्ततिरिवोद्धणरेखासंहतिर्व्युदलसद् भ्रुकुटीनाम् ॥५६॥

निर्यता बहिरसम्भवतान्तस्तेजसैव तरलेन परीताः ।
उत्प्लवद्बहुलपाटलिमानो भूभुजः प्रतिभयां रुचमूहुः ॥५७॥

ऊष्मणा निजतलश्वसितानामुष्णतामतितरां प्रतिपन्नः ।
चामरव्यजनपातसमुत्थो भूपतीनभितताप समीरः ॥५८॥

सभ्यदूतवचसा[2] समयेन स्वेन तज्जनितया च रुषासौ ।
भूभृतामुभयतोऽपि समूहः कृष्यमाण इव कम्पमवाप ॥५९॥

तीव्रकोपजनितैर्नृपलोकः स्वच्छकुन्दमुकुलप्रतिरूपैः ।
स्वेदविन्दुनिकरैः शुचिमुक्ताकञ्चुकावृत इव प्रतिरेजे ॥६०॥

पीडनं[3] कृतरुजामतिगाढं मोचयन्निव मुहुर्दशनानाम् ।
तीव्रकोपजनितोदयमाच्छंद् वेपथुः क्षितिभृतामधरोष्ठः ॥६१॥

---

1. 'नतु पते' ग. 2. 'सत्य' ख. 3. 'पीडना कृ'–क

भर्तरि प्रकुपितेऽपि महिम्ना न स्वयं दिशति यत् प्रतिवाचम् ।
उत्ससर्ज वचनाशनिमुग्रं भूभृतां सरभसेन समूहः ॥६२॥

गच्छ दूत वचनस्य तवास्य श्रोष्यति प्रतिवचो नृपतिस्ते ।
आगंसां जगति भृत्यकृतानामीश्वरे ननु पतिष्यति दण्डः ॥६३॥

अस्मदस्त्रपरिकृत्ततनूनां शोणितासवमरातिचमूनाम् ।
पास्यति प्रणयिनेव विलासिन्यन्तकेन सममद्य धरित्री ॥६४॥

स्थान[1] एव खलु मानधनोऽसावात्मनः प्रयतते निधनाय ।
शत्रुभिः कथमसौ ह्रियमा(णां? णो) द्रक्ष्य एव बलवान्
घटितो वः ॥६५॥

आगतस्य तव भर्तुरवश्यं पत्रिणां रणमुखे पदवीं नः ।
अच्युतोऽपि शरणं न भविष्यत्यन्तकारिरमराधिपतिर्वा ॥६६॥

आदधातु पदमद्य तदाजौ मूषिकः सपदि मूर्ध्निगिरेर्वा ।
अत्यपातयदसौ बत कालं देवमेव शरणं समुपैतुम् ॥६७॥

इत्युक्त्वा नरपतिभिर्निरस्यमानो
दत्त्वा तत्सदृशमथोत्तरं स भूयः ।
आकाङ्क्षत्यहिमरुचौ दिशं प्रतीची-
मभ्याशं प्रणिधिरुपागमत् स्वभर्तुः ॥६८॥

आकर्ण्य दर्पमथ दूतमुखाद् रिपूणां
क्रुद्धस्य दीप्तमवलोक्य मुखं नृपस्य ।
भानुः[2] स्वमण्डलपराजयशङ्कयेव
पार्श्वं जगाम परमस्तमहीधरस्य ॥६९॥

1. 'नमेव' ख. 2. 'स म' ख.

निजभुजबलवीर्यख्यापनासक्तचित्तैः
सह नृपतिसमूहैरुत्थिते साम्पराये ।
शिवकरजयलक्ष्मीसङ्गमोत्कण्ठितोऽसौ
व्यगमयदथ रात्रिं वीरपानोत्सवेन ।।७०।।

इति मूषिकवंशे पञ्चमः सर्गः।

षष्ठः सर्गः

अथोच्चकैररिहृदयप्रमाथिना
पताकिनीपरिकरबन्धहेतुना ।
प्रतिस्वनप्रहतकुलाद्रिकन्दरं
निशात्यये नृपपटहेन दध्वने ।।१।।

प्रबोधिनः समरसमु(द्य?त्क) मानकै-
र्वधूजने सुभटजनस्य तत्क्षणम् ।
रसान्तरप्रणिहितरागबन्धनो
गलग्रहः प्रशिथिलमानमानशे ।।२।।

प्रकोपतः क्षपितसमस्तयामया
समुच्चलन् रणविधये ससम्भ्रमम् ।
ससाध्वसं प्रणयहृताभिमानया
प्रियः स्वयं हरिणदृशाभिषस्वजे ।।३।।

स्मरद्रुमप्रतिकलिता मदोद्धतैः
स्वसम्मुखप्रसृतविपक्षकोपितैः ।
बभञ्जिरे कथमपि राजकुञ्जरै-
र्वधूजनप्रणयकटाक्षशृङ्खलाः ।।४।।

प्रियस्य नो समिति विपत्तिशङ्कया
तथा भृशं वरयुवतिर्व्यतप्यत ।
समुज्झिते वपुषि यथास्य भाविभि–
र्गतैः स्मृतिं सुरगणिकारतोत्सवैः ॥५॥

परस्य न व्यभवदमर्षपावकं[1]
प्रिया स्वयं शमयितुमश्रुधारया ।
....
.... ॥६॥

प्रियाजनं समिति हृदि व्यवस्थितं
परायुधात् पतत इवाभिरक्षितुम् ।
गतस्पृहा वपुषि निजेऽपि भूभुजा–
मुरश्छदं घनतरमावलिर्दधौ ॥७॥

विरेजिरे विरचितरुक्मकङ्कट–
प्रभावलीपरिगतवक्षसो नृपाः ।
रणोद्यमे हृदयजुषः स्वतेजसो
विसर्पिणीर्बहिरिव बिभ्रतः शिखाः ॥८॥

उपस्थितं निरसितुमुग्रपौरुषं
बलं द्विषामविदितभङ्गया क्वचित् ।
समानतं पुरुषमिवाज्ञया पति–
र्ज्यया परः समघटयच्छरासनम् ॥९॥

भयानकः सपदि बभूव गोधया
विवेष्टितौ दधदपरः पृथू भुजौ ।

1. 'मुख्य पा -ब.'

परावृतौ परित इवाहिकन्यया
स्थिरायतौ मलयगिरिर्वनस्पती।।१०।।

निबद्धयोः सपरिकरस्य धन्विनो
निषङ्गिणोरभिनि(ह? हि)ताः शिलीमुखाः।
अवाङ्मुखीं स्थितिमभजन्त पृष्ठतो
निवेशनाददधिगतयेव लज्जया ।।११।।

निपीडिता निबिडतरेण मुष्टिना
परिस्फुरत्यसिलतिका युयुत्सता।
रणोत्सवप्रसरनिबद्धदोहला
निरोधतः परिकुपितेव निर्बभौ ।।१२।।

प्रथीयसः क्षितिपतयो नियन्तृभिः
प्रकल्पितानधिरुरुहुर्मतङ्गजान्।
परिष्कृतान् जलधरमासवासरै-
र्घना(न्) घनानशनिभवा इवाग्नयः ।।१३।।

अधिष्ठिता हयपतयः स्वसादिभि-
र्बभुश्चले[1] बलविसरे बलोद्यमात्।
अधीशितुः क्षुभितजलस्य यादसा-
मभिस्फुरद्गुरुमकरा इवोर्मयः १४।।

अयोजयत् रथवरमाशु सारथि-
र्मनोरथैः[2] समगतिभिस्तुरङ्गमैः।

1. 'रण' क. ख. 2. 'नोगतैः स' क. ख.

प्रवृत्तये धरणिपतेरिहेन्द्रियैः
क्रियासहं विधिरिव देहमात्मनः ॥१५॥

अथ क्रमं विधिवदहर्मुखोचितं
स कर्मणां सपदि विधाय दंसितः ।
धृतायुधो रथमधिरुह्य सज्जितैः
समं बलैः समुदचलन्नरेश्वरः ॥१६॥

निरुन्धति[1] श्रुतिपथमानकध्वनौ
पताकिनीरजसि च पद्धतिं दृशाम् ।
समुद्धते समरकुतूहले मनाक्
क्षणं जनः सजल इव व्यजायत ॥१७॥

महीरजःपरिमिलितातपत्रया
सरंहसा धरणिभृतोऽथ सेनया ।
परिष्कृता बहुलहिमोत्कराविलैः
सिताम्बुजैः परिजहसे सरिद्वरा ॥१८॥

उपप्लवादतिमहतो निशाकरं
विभावरी तिमिरचयादिवोत्थितम् ।
अभीप्सितं पतिमिव हेहयाश्रया
मुदा चमूरभजत मूषिकेश्वरम् ॥१९॥

अथोज्ज्वलैर्बलकिरणैर्निदाघजे
रवाविव प्रतपति तत्र राजनि ।
समुच्चरत्पटहमहाशनिस्वनं
वलाहकैरिव रिपुभिर्विचुक्षुभे[2] ॥२०॥

1. 'रुध्यति'–ख. 2. चक्षमहे–ख.

समुच्चलत्युरुतरकोपचोदिते
 महद् बलं मगधपतौ व्यलोलयत् ।
बिवर्तिते युगपरिवर्तवायुना
 सरित्पतौ सलिलमिवाखिलं जगत् ।।२१।।

अथोल्लसत्पृथुतरसैन्यकाननौ
 प्रवृद्धया सपदि रुषा प्रचोदितौ ।
परस्परं प्रलयसमीरणाहतौ
 शिलोच्चयाविव नृपती स(मे?मी)यतुः ।।२२।।

पुरःसरैस्तुरगबलैः समुद्धतो
 निरन्तरक्षितितलरेणुसञ्चयः ।
जनक्षयव्यसनभियेव दारुणं
 समुद्यमं नृपबलयोरवारयत् ।।२३।।

विसर्पिभिर्गगनतले रजोभरैः
 परावृते तपनमयूखमण्डले ।
प्रकाशतां भृशमगमद् रणाजिरं
 महीभृतां मकुटमणिप्रभावतः ।।२४।।

रथस्वनैरिभकुलबृंहितारवैः
 समुद्धतैरथ भृशमश्वहेषितैः ।
उपस्थितोभयबलदुन्दुभिध्वनि-
 र्घनीकृतो गगनतलं समस्पृशत् ।।२५।।

(प्रिया)[1]जनो दयितविपत्तिशङ्कया
 द्रुतं जहौ मथितमनाः स्वमण्ड(लं?नम्) ।

1, 'बिवर्तिन' म.

महाहवप्रणिहतवीरलोलुपः
प्रसाधनं व्यरचयदप्सरोगणः ।।२६।।

निपीडितैः प्रसभविकर्षणाद् भृशं
बलीयसा समरमुखे धनुर्भृता ।
विधित्सुभिर्मुहुरिव तन्निवारणं
शरासनैः प्रणतशिरो विचुक्रुशे ।।२७।।

विलोलिताः सपदि नरेन्द्रबाहुभिः
समुल्लसत्कनकफलाग्रभासुराः ।
शरोत्करं रणभुवि चापयष्टयो
विषानलं फणिवनिता इवासृजन् ।।२८।।

परस्परप्रहतशिलीमुखावली-
समुत्थितां पवनजवैरुपाहिताम् ।
परासितु दहनशिखामिवाम्बरे
मुहुर्मुहुः परिववृते पताकया ।।२९।।

परिच्युतैः सममिव चापमण्डला-
न्महेषुभिः सुभटगणः करैरिव ।
प्रदीपितस्तरणिरिव स्वतेजसा
व्यदारयन्मुखकमलानि विद्विषाम् ।।३०।।

मदाम्बुभिर्बलकरिणामितस्ततः
खिलीकृते[1] धरणिपरागसञ्चये ।

1. 'स्थनीकृतो' ग.

उपानयत् कबलितभानुदीधितिः
शरावलिर्जगदिदमन्धकारताम् ।।३१।।

परिक्षताः प्रतिमुखवर्तिभिः परैः
समिद्धया प्रतियुयुधुः क्रुधा भटाः।
अमर्षिणां हृदयगतस्य तेजसो
ननु द्विषत्प्रहरणमिन्धनायते ।।३२।।

मुखान्तरे द्विरदपतेर्निमज्जता
समीरणप्रचलितपि (ञ्ज? च्छ) राशिना ।
प्रतिक्षणं भ्रमरकुलस्य शङ्कना
विचिक्षिपे मदमधुपानविभ्रमः ।।३३।।

चकाशिरे शरनि (शि? चि) ताः समन्ततो
मुहुर्मुहुर्विधुतपटा (ल? ग्र) पाणयः[1] ।
महाहवे नृपरथकेतुयष्टयो[2]
भयाद् भृशं हृषिततनूरुहा इव ।।३४।।

परायुधप्रपतनमूढसारथा—
वितस्ततः प्रचलति कस्यचिद् रथे ।
क्षणे क्षणे परिघटितां यदृच्छया
परेपरे प्रतिभटतां प्रपेदिरे ।।३५।।

विकर्षणे निजधनुषः परेषुणा
निकीलितस्तिमितकरद्वयोऽपरः ।

1. 'विधृत' क. 2. सप्तमो' ग.

प्रकोपितव्यथितमनाः स्वपत्रिणो
न मोक्षणे विभुरभवन्न संहृतौ ॥३६॥

निपातितां प्रबलरुषा निषादिना
निमज्जतीमपि निजकुम्भमण्डले ।
अभिद्रवन् प्रतिरिपु शक्तिमायतां
मतङ्गजः सृणिलघुमभ्यमन्यत ॥३७॥

पतत्यसून् कतिचन शस्त्रजालके
परे जहुः स्वपतनवेदनागमे ।
अथापरे कुलिशकठोरचञ्चुभिः
पतत्रिभिः सरभसमान्त्रकर्षणे ॥३८॥

द्विषग्दणप्रहरणमुक्तजीवितं
समाक्षिपद् रणभुवि यौधमप्सराः ।
पिशाचिका पिशितनिबद्धदोहला
कलेबरं सरसममुष्य शोणितैः ॥३९॥

समुद्धृतैरपघनतो रुषात्मना
शिलीमुखैररिनिवहानभिघ्नतः ।
क्षयं गतेष्विषुधिशरेषु कस्यचि–
न्निजं वपुः समिति ययौ निषङ्गताम् ॥४०॥

समुद्धृतं रणभुवि गृध्रवायसै–
र्द्रुतं शिरः स्वमिव निरोद्धुमुत्थितैः ।
इतस्ततो विविधमुदस्तबाहुभि–
र्विवर्तितं व्यधित कबन्धमण्डलैः ॥४१॥

धनुर्धरैः क्षितिपघनैरितस्ततो
निपातितेष्विषुविसराम्बुवृष्टिषु ।
परिस्फुरत्करिमकराभिरायतं
विपप्रथे परिदिशमा(न्त्र? स्र)सिन्धुभिः ॥४२॥

प्रतापवानथ सुबहूनशेषतो–
भवानिव द्युतिभिरहस्करो रसान् ।
महेषुभिः प्रतिनृपसैन्यसम्पदा–
मसावसूनहरत हेहयाधिपः[1] ॥४३॥

हते बले महति रथैकसाधनः
स मूषिकं नरपतिरभ्यवर्तत ।
परिक्षये परमकलाव्यवस्थितो
विभावरीकर इव वत्स(के? रे)श्व(रः? रम्) ॥४४॥

सहस्रशो विकिरति तत्र सायकान्
महत्तरो मगधपतौ महीपतिः ।
मुहुर्मुहुर्विसृजति वृष्टिमुच्चकै–
र्वलाहके गिरिरिव न व्यकम्पत ॥४५॥

परिक्षरद्रुधिरविलोहिताकृति–
र्नराधिपस्तनुनिचितैः शिलीमुखैः ।
अहस्करः स्फुरदरुणारुणद्युति–
र्विसर्पिभिः किरणचयैरिवाबभौ ॥४६॥

1. 'हेभर':-ग

अतिक्रमद्द्विगुणनिबद्धमत्सरो
मुखं धनुर्वलयफणा(हृ? भृ)तं दधत् ।
फणाभृतां पतिरिव हेहयेश्वरो
दुरुत्सहं शरविषमुत्ससर्ज सः ।।४७।।

बलेन तं द्विषमथ वीक्ष्य दुर्जयं
सुवर्मणा दहनकृदस्त्रमाददे ।
परिक्षरद्घनध्वदभरितान्तरिक्षया
स तत्क्षणादशमयदस्त्रविद्यया ।।४८।।

ततः क्षणादहिकुलवक्त्रनिर्गलद्–
विषानलक्षुभितसमस्तदिङ्मुखम् ।
पुनर्द्विषा स विहितमस्त्रमस्त्रजै–
र्गरुत्मतां सपदि गणैरशीशमत् ।।४९।।

इति द्विषा रुषितधिया स्वविद्धये
कृतं कृतं गुरुतरमस्त्रमस्त्रवित् ।
प्रतिक्षणं रणभुवि हेहयेश्वरः
सुसंहितैः प्रतिविधिभिर्न्यवारयत् ।।५०।।

पराजितेष्वरिषु परस्य तेजसा
भुजेन[1] किं विपुलबलेन भूभुजः ।
इति स्वयं प्रविगणयन् धरापति–
र्द्विषद्वधे किमपि (स) नास्त्रमाददे ।।५१।।

अथ क्षणाद् रिपुगणशोणितारुणै–
र्धरापतिर्निशितमुखैः शिलीमुखैः ।

1. विफल क, प.

स्वरंहसा जितपवनानपातयत्[1]
सुवर्मणो रथतुरगान् ससारथीन् ॥५२॥

इदं क्षमं युधि विर(त?थ)स्य भूपते-
रिति स्वयं तदनुगुणे पथि स्थितः ।
गदाधरः स्वरथवरादविक्षता-
दवातरद् द्रुतमथ मूषिकेश्वरः ॥५३॥

समुज्ज्वलं वदनममर्षवह्निना
दधद् परोऽप्यथ गदयातिभीमया ।
अवातरद् द्रुतमिव दीप्तभास्करो
महोल्कया युगपरिवृत्तिवासरः ॥५४॥

विचेरतुः समरमुखेऽथ मण्डलं
मुहुर्मुहुर्मगधनरेन्द्रमूषिकौ ।
विदूरगौ क्वचिदपरत्र सङ्गतौ
बृहद्द्युती गगन इवेन्दुभास्करौ ॥५५॥

परस्य न क्वचिदपि रन्ध्रदायिनौ
परान्तरेष्ववहितदृष्टिमानसौ ।
महाशनिध्वनि गदयातिचण्डया
परस्परं धरणीपती प्रजह्रतुः ॥५६॥

गदाहतक्षतजविलोहिताकृती
गजाविव क्षरितमदाम्बुनिर्झरौ ।
प्रदर्शितस्थिरतरशिक्षया युतौ
विजह्रतुर्विपुलबलौ नरेश्वरौ ॥५७॥

---

1. त्रु सां-ख.

स्वतेजसा सपदि विदीपितान्तरः
प्रगर्जितक्षुभितसमस्तदिङ्मुखः ।
वनस्पतौ जलद इवाशनिं गदां
सुवर्मणि क्षितिपतिरभ्यपातयत् ॥५८॥

गदाहतिव्यथिततनुः स तत्क्षणं
पतन् भुवि प्रमुषितयाथ संज्ञया ।
नराधिपो हिमगिरिसिद्धसीमया
नवश्रिया सममसुभिर्व्ययुज्यत ॥५९॥

इतस्ततः स्तिमितनिगीर्णगात्रको
नराधिपः शयनगतो व्यरोचत ।
चिरोद्धृतक्षितिभरलब्धविश्रमः
परिस्वपन् सुखमिव मेदिनीपतिः ॥६०॥

परासुतामुपयति तत्र भूपता-
वशिश्रियुर्धरणिभृतोऽथ मूषिकम् ।
वनस्पतौ परिपतति स्वसंश्रये
पुनर्द्रुमं परमिव पत्रवाहनाः ॥६१॥

सुवर्मणः क्षितिपतिरग्निसात्क्रियां
प्रयोज्य स प्रथितयशा यथाविधि ।
स्वविक्रमश्रवणनिबद्धकौतुकं
प्रमोदयन् जनमजिहीत हेहयान् ॥६२॥

माहिष्मतीमथ गतः प्रचलत्पताकां
पात्रीभवन् पुरवधूनयनोत्सवानाम् ।

अन्तः प्रमोदमवहन्नृपतिः समेत्य
जातिस्मरो जन इवापरजन्मभूमिम् ॥६३॥

तत्र प्रविश्य नृपमन्दिरमूर्ध्नि[1] चित्रं
हृत्वा सुतां क्षितिपतेरथ भद्रसेनाम् ।
मात्रा समर्पितममुष्य सुतं महीयान्
सम्यक् चकार नृपतिर्मगधाधिनाथम् ॥६४॥

कन्यामथैनां परिणीय कान्तामध्यास्य तां हेहयराजधानीम् ।
संशोधयामास नयागमज्ञः स भारतं नातिचिरेण वर्षम् ॥६५॥

क्रमेण वर्षाण्यपराणि जित्वा द्वीपांश्च शीतद्युतिवंशदीपः ।
भूत्वा स राजा भुवि चक्रवर्ती भ्रूक्षेपनेयां ककुभं बभार ॥६६॥

पुत्रावथास्य वटुनन्दननामधेयौ
ख्यातौ जगत्सु महिषी जनयाम्बभूव ।
व्यातन्वती हृदि पदं विनयोपपन्ना
नीतिः परा नरपतेरिव कोशदण्डौ ॥६७॥

पुत्रे कृत्वा श्रियमनुपमामग्रजे हेहयानां
पृथ्वीपालः स पुनरपरेणान्वितो नन्दनेन ।
स्वस्ति कुर्वन् दिशि दिशि करैः कल्पयित्वा क्षितीशान्
भूयः कोलं भुवनतिलकं प्राविशद् राजधानीम् ॥६८॥

तत्रोल्लसद्ध्वजपटे पुरसुन्दरीणां
नेत्रैः सलाजनिकरैरवकीर्यमाणः ।
विस्तीर्णदीप्तिनिकरो गगनस्य राजा
मध्यं दिनेश इव मन्दिरमाससाद ॥६९॥

1. 'मूर्धनि'—ब.

क्रतुभिरमरभर्तुर्वाजिमेधप्रधानैः
प्रमदमुदितशङ्काविश्लथं सन्दधानः ।
प्रिययुवतिमिवैकां वृद्धिहेतुं प्रजाना-
मचिरमभृत लोकालोकसीमां धरित्रीम् ।।

भुवनभरसहे सुते स तस्मिन्
सुचिरधृतां धुरमात्मनो निधाय ।
अथ वनमधिगम्य योगनिष्ठः
शिवमनपायि पदान्तरं प्रपेदे ।।

इति मूषिकवंशे षष्ठः सर्गः

सप्तमः सर्गः

अथ वासरश्रियमिवाहिमद्युतिः परमः पुमानिव च पद्मदेवताम् ।
सकलामुवाह धरणीं स नन्दनः पतिरम्भसामिव नदीं त्रिवत्मगाम् ।।१।।

पितृनिर्विशेषपटुना स्वतेजसा जगति प्रजास्विह विनीतवृत्तिषु ।
सचिवेषु भारमवसज्ज्य भूपतिर्विषयोपभोगनिरतो बभूव सः ।।२।।
अथ रूपयौवनविलासशालिभिस्तरुणीगणैः सह विहर्तुमिच्छतः ।
प्रियमाचरन्निव महीभृतः क्षितौ समयः स्मरैकसुहृदादधे पदम् ।।३।।

............परिपटुभिर्गभस्तिभिर्निहितं हिमाद्रिगहनेषु नित्यशः ।
तुहिनं समूलमिव हर्तुमुद्यतो दिशमुत्तरां दिनपतिर्व्यगाहत ।।४।।

तटनिर्झराम्बुकणजालवाहिनः परिमृष्टचन्दनलताग्रपल्लवाः ।
कलशोद्भवाहुतिसुगन्धयो ववुर्मलयाद्रिकाननभुवः समीरणाः ।।५।।

परिशोषणानि विरहातपैर्भृशं हृदयानि दग्धुमिव विप्रवासिनाम् ।
समधुक्षयत् कुसुमरेणुमुत्किरन् मुखमारुतेन सुरभिः स्मरानलम् ।।६।।

प्रथमाङ्कुरस्य सहकारजन्मनः प्रसवं निवेदयितुमुद्यतैरिव ।
मदरक्तकण्ठमधुरस्वरैर्मुहुः परितो वनं परभृतैर्विसस्वने ।।७।।

प्रतिशाम्यतः शिशिरकालनिर्गमाद् व्यसनागमस्य तुहिनाम्बुजन्मनः ।
उपलक्षणार्थमिव पद्मिनी शनैरुदमीमिषत्[1] तरलमम्बुजेक्षणम् ।।८।।

मकरन्दपङ्कलुठितारुणाङ्घ्रिभिः कलनादिनीभिरबलाभिरन्वितैः ।
मधुसादमन्दगतिभिर्मधुव्रतैः[2] सरसोत्पलेषु सरसीषु बभ्रमे ।।९।।

प्रसवोदयं परिवहन्त उच्चकैर्द्विपदानगन्धविसरन्मदोत्करैः ।
कुपितैर्गजैः प्रमुदितैश्च षट्पदैः सरसा वनाम्रतरवोऽभिजग्मिरे ।।१०।

उपकूजितैः परभृतं मनस्विनीहृदयावभेदिनमशोकपादपः ।
प्रविलोलपल्लवकराग्रसंज्ञया[3] त्वरयन् मुहूर्मुहुरिव व्यराजत ।।११।।

भ्रमरापविद्धमृदुपुष्पकेसरप्रसरास्तरच्छुरितरत्नभूमिषु ।
प्रतिरुद्धसूर्यंकिरणेषु माधवीवलयान्तरेषु मिथुनान्यरंसत ।।१२।।

परिपाटलैर्विकचपुष्पराशिभिर्विकचः पलाशवनपादपो बभौ ।
सततं समित्परिचयाज्जिघत्सुना परिरुध्यमान इव जतवेदसा ।।१३।।

अधितिष्ठता दिनकृता हिमाम्भसां पटले मुखच्छद इवोपसंहृते ।
प्रययाचकार मधुवासरद्विपः पथिकेषु हस्तमिव दक्षिणानि (लः? लम्)
।।१४।।

---

1. मयत्-क. 2. म-क. 3. 'रया मु' ख·

बलवेणुमण्डल इवोद्यतो मधोस्तरुपुष्परेणुनिचये समुत्थिते ।
उपलब्धमित्र इव मन्मथश्चलन् गुरुमानिनीहृदयदुर्गमग्रहीत् ॥१५॥

प्रचलीकृता जलतरङ्गविभ्रमैस्त्रपयेव नूतनसमागमोत्थया ।
परिचुम्बति प्रततमम्बुजाननं कलहंसयूनि नलिनी समाक्षिपत् ॥१६॥

तपनीयपात्रतरलच्छदावलीपरिवेषमण्डलमनोज्ञकेसरैः ।
नवकर्णिकारकुसुमैर्विकासिभिः प्रसभं जनस्य नयनानि जह्रिरे ॥१७॥

पवनोद्धृतं कुसुमरेणुसञ्चयं ददृशुर्जना हरिसटाग्रपिङ्गलम् ।
स्मरगृह्यलोकदहनार्थमुद्यतं पुनरीक्षणानलमिव स्मरद्विषः ॥१८॥

हरिचन्दनप्रसवसौरभोचिते मलयोदये स्पृशति मातरिश्वनि ।
सहसा चलत्सुमनसा वनस्पतिर्मदना(र्थं? र्त्त)येव लतयाऽभिषस्वजे ॥१९॥

गतवत्युपान्तमतिमुग्धतावशात् पवने मधुप्रियसखे पराङमुखीम् ।
परिभर्त्सयन्त्य इव माधवीं समं भ्रमराङ्गना भृशतरं विचुक्रुशुः
॥२०॥

पिककन्यया पृथुगुणानुरक्तया तरुणाम्रपादपव(न? रः)सुनिर्वृतः ।
कुपितान्यपार्थिवबलैरिवोत्थितैस्तुमुलं मधुव्रतकुलैररुध्यत ॥२१॥

प्रविलोलयामि धियमित्थमेव वो यदि न क्षणात् त्यजथमानवि भ्रमम् ।
इति भीषयन्निव मरुन्मनस्विश्चलयाञ्चकार तरुपल्लवावलीः ॥२२॥

परिवारिता विरहदाहपावकैः प्रमदा निरीक्ष्य मदनानिलोद्धतैः ।
उपकूजितैः परभृता मदायतैः पथिकानिव प्रतिमुहूर्तमाह्वयन् ॥२३॥

स्फुटभिन्ननागमुखगन्धबान्धवश्चलकेसरो विधुतसत्त्वपल्लवः ।
परिकम्पिताद्रिगहनः समापतन्नुपमां दधौ मृगपतेः समीरणः ॥२४॥

वनसम्पदा विकसितप्रवालया विलसल्लतागृहतलप्रियालया ।
जनता दुरुत्सहतरस्मरामया ह्रियते सम कवितया स्म रामया ॥२५॥

अथ मन्मथोद्धततनूभिरुन्मदैः प्रमदाजनैः सह विहर्तुमायतम् ।
सुरभिप्रवेशसुभगान्तरं[1] गिरेः प्रययौ वनं प्रति स हैहयेश्वरः ॥२६॥

मदविभ्रमस्खलितपादनूपुरक्वणितानुविद्धवलयस्वनोग्दमैः ।
चलतो नृपस्य ललितैः कराम्बुजैर्व्यजनानि मन्दमधुवन् नतभ्रुवः ॥२७॥

स्फुटयावकार्द्रचरणक्रमाहिताः शनकैर्नितम्बभरनिम्नपश्चिमाः ।
परिजृम्भमाणशिखरैस्तृणोत्पलैः पदपङ्क्तयश्चलदृशो विचक्रिरे ॥२८॥

अपदेशमन्थरगतिः पुरोगतां न किलोपसर्तुमशकद् युवाऽबलाम् ।
प्रविलोकयन् पृथुकटीभरालसां रुचिरां तदीयगतिविभ्रमश्रियम् ॥२९॥

जघनोरुयुग्मगुरुभारखिन्नयोर्ध्रुवमद्य भाव्यमशिवेन जङ्घयोः ।
स्वजनाशशङ्किभिरितीव योषितां मणिनूपुरैरनुपदं विचुक्रुशे ॥३०॥

प्रमदाजनस्य कुचहेमकुम्भयोर्गतिविभ्रमेण चलतोरनुक्षणम् ।
चटुलोत्तरीयवसनावमर्दनान्नवपत्रभङ्गरचना बभञ्जिरे ॥३१॥

पुलकाञ्चितप्रियकरावलम्बना पुरसुन्दरी चरणचारुविभ्रमा ।
अधिरूढयानमपराङ्गनागनं रशनामणिप्रणदितैरिवाहसत् ॥३२॥

---

1. 'सुभद्रान्त' ख.

प्रविधूयमानगतयोर्मुहुर्मुहुः श्वसितानिलैरपि परिश्रमायतैः।
शुभसौरभोत्सुकधियो न योषितां वदनाम्बुजानि विजहुर्मधुव्रताः ॥३३॥

सुदुरुद्वहस्तनकटीभरालसैश्चरणैः प्रवालमृदुभिस्तमध्वनः ।
अवधिं वनान्तरविहारदोहलादबलाजनः कथमपि व्यलङ्घयत् ॥३४॥

अथ संप्रविष्टबहुसत्त्वसङ्कुला तरुणैः प्रवालवलयैरलङ्कृता ।
परिमन्थरानिलतरङ्गिता जनैः पुरतो नदीव ददृशे वनस्थली ॥३५॥

कृततूर्यनादमिव पत्रिणां गणैः प्रचलत्पताकमिव बालपल्लवैः ।
अथ ते सधूममिव भृङ्ग[1]पङ्क्तिभिर्विविशुर्वनं पुरमिवोत्सवोत्तरम् ॥३६।

निबिडप्रसूनभरनम्रमूर्धभिः स्वकरप्रचेयविभवैर्महीरुहैः ।
निचिता नितान्तमचलस्थलीभुवश्चकृपुर्दृशः सपदि वामचक्षुषाम् ॥३७।

अपराश्चलन्ति लतिकाः कथं बतेत्यबलासु सम्भ्रममिवाधिजग्मुषः ।
व्रततीजनस्य नवमञ्जरीमुखादपतन्मुहुर्दृश इवालिपङ्क्तयः ॥६८॥

[2]परितो विसर्पिणि मुहुर्मदोद्धतं भ्रमराङ्गनानिवहगीतनिस्वने ।
पवनश्चलन् मृदुतरं शनैः शनैरलकावलीश्चलदृशामनर्तयत् ॥३९॥

कुसमश्रिया चकृषिरे भृशं दृशः श्रुतयः कलैरलिकुलस्य कूजितैः ।
स्वपदोन्मुखेषु तरुणेषु योषितां प्रययुः स्थितिं न हृदयानि कुत्रचित् ।४०॥

अलिगर्जितानि परपुष्टकूजितैरपि तानि किम्पुरुषगीतनिस्वनैः ।
अथ ते परेऽपि निनदा बभञ्जिरे [3]बहुलैश्चमूकलकलैरिलाभृतः ॥४१॥

---

1. 'पत्रिभि' ग. 2. 'परतो' ख. 3. 'बहुलै' –ग.

प्रणतिं लताः सपदि पुष्पसम्पदामबलाभिरेव हरणाय निन्यिरे ।
तरवो नृभिः सकल एव खल्विह स्वजनस्य गच्छति जनो विधेयताम् ॥४२॥

प्रमदाजनस्य कुसुमोच्चये मुहुश्चरणार्पणं वपुषि लब्धुमिच्छुभिः ।
विटपान् मृदूनपि ननाम शाखिनां युवभिः समुन्नमयितुं व्यभूयत ॥४३॥

कलितं करेण कुसुमं नतभ्रुवः स्फुरता परावृत्तमुखं नखांशुना ।
परिसर्पिभिः परिमलैः समन्ततो मधुपायिभिश्च मुखरैर्व्यविच्यत ॥४४॥

स्तबकाद् वधूकरभृतान्महीरुहः प्रसवो जरन्नुपययौ परिच्युतिम् ।
उपयाति भर्तरि वशं नतभ्रुवः सहजोऽपि यः परिणतो न तिष्ठति ॥४५॥

स्फुरितोर्ध्वबाहुरसितेक्षणोच्चकैः स्वयमेव पुष्पमपचेतुमिच्छती ।
चरणाग्ररुद्धधरणि स्थिता पुनः स्तनयोर्भरेणघनयोरवापतत् ॥४६॥

ननु तिष्ठति प्रियतमोऽयमुच्चकैः कुसुमं ग्रहीतुमलमालि! नोत्सहे ।
इति याचिता व्यतिकरप्रवृत्तये निपुणा सखी नववधूमभाषत ॥४७॥

अवतंसभूमिमधिरुह्य योषितां व्यचलन् मरुत्परिगमेण पल्लवाः ।
दशनच्छदस्य जयिनः पुरो दशामपरिस्फुटामिव विधातुमात्मनः ॥४८॥

परितो गलत्कुसुमरेणुदुर्दिनं विटपं युवा परिधुनन् वनस्पतेः ।
क्षुभितालिवृन्दपरिपातभीतया प्रियया भृशं चकितयाभिषस्वजे ॥४९॥

असमक्षमन्ययुवतेर्विलासिना कुसुमं समर्पितमधीरलोचना ।
प्रविधूय भङ्गमभिधीयतामिति प्रकटीचकार वचसैवमुच्चकैः ॥५०॥

मम तावदेष सुमहाननुग्रहो लपिता यदस्मि भवता प्रियाख्यया ।
उपकर्ण्य गोतमिपदे समर्पितं हृदयस्थिता तु दयिता तवैष्यति ॥५१॥

इति साभ्यसूयमभिधाय भामिनी निहितं प्रियेण निजगोत्रभेदिना ।
कुसुमं व्यमुञ्चदलिमण्डलाकुलं गलिताञ्जनेन सह बाष्पवारिणा ॥५२॥

अलकेषु यत् प्रियतमेन कौसुमं सुदृशो रजः सुललितं व्यकीर्यत ।
अनयत् तदक्षिगतमन्ययोषितो विततास्रुणी कलुषतां विलोचने ॥५३॥

पतितं प्रियादृशि रजः प्रसूनजं सतताक्षिचुम्बनसतृष्णया धिया ।
अपदे विधाय तरुणो मुखानिलं न विवेद नाम सुचिरं व्यपोहितुम् ।५४।

अलकप्रसूननिचयाभिलाषिणः पतिता विपक्षनयनोपरोधिनः ।
स्फुटमीक्षितुं प्रियतमामभीच्छतः प्रियतां ययुर्युवजनस्य षट्पदाः ॥५५॥

स्खलिते लघीयसि चिरं प्रियो जनः परिपीड्यते बत यदत्र खण्डनैः ।
अपि विह्वलस्य शिथिले गलग्रहे प्रणयस्य तद् भवति वामसाम्प्रतम्
॥५६॥

अकृशेऽपि तावदसुभर्तुरागसि प्रमदाजनस्य कलहः प्रशस्यते ।
प्रबलानुतापविधुरः पदानतो घटयत्यसौ शिरसि यावदञ्जलिम् ॥५७॥

अनुनीतवत्यसुसमेऽपि सर्वथा यदि न प्रसादमुचितं गमिष्यसि ।
प्रतिकोपभाजि[1] पुनरत्र दुष्करं न खलु त्वमप्यनुनयं न वेत्स्यसि ॥५८॥

तदलं प्रियस्य हृदयस्य चात्मनः[2] परितापनीभिरतिरोषवृत्तिभिः ।
दृढमानबन्धनिभृतां वधूमिति स्फुटमन्वशात् पटुतरः सखीजनः ॥५९॥

---

1. 'परिकोप' ग. 2. 'पाप्मनः' ग.

५४

विकचप्रसूनकलिकार्पणोन्मुखे परिपश्यति प्रियतमे कृतादरम् ।
सपदि त्रपा न खलु केवलं प्रियामकरोदपि प्रतिवधूमधोमुखीम् ।।६०।।

कुचमालया श्रमजलार्द्रकुङ्कुमप्रकरानुविद्धनवकेसरश्रिया ।
प्रियया युवा स्फुटरुषाभिसंयतः स्वकृते व्यधत्त बहुमानमागसि ।।६१।।

प्रणयादरेण सुमनाः प्रियाहिते सुमनोभिराभिरपि सैव सेव्यताम् ।
मयि दुर्मनस्यलममूभिरुज्ज्वलो न भवेद् ध्रुवं विषमयोः समागमः ।६२।

अभिमत्यशान्तमपराङ्गनाजनप्रणयापराधकलहं शनैः शनैः ।
कुसुमोच्चयानुपहर[1]न्तमुज्ज्वला वचनैरिति प्रतिजघान मानिनी ।।६३।।

कुसुमं प्रयच्छति विपक्षसन्निधौ दयिते विशङ्कममुना वधूः पराम् ।
पुर एव दत्तकुसुमेत्यमन्यत प्रणयो विरोधमपदेऽपि शङ्कते ।।६४।।

अधिगम्य भावमतिदक्षिणा सखी मदनावरुद्धमनसो विलासिनः ।
स्वकरप्रचेयमपदिश्य पल्लवं विजनं निनाय रमणीं लतागृहम् ।।६५।।

क्षरदास्रवारिलुलितस्तनान्तरे निहितो नवप्रसवरेणुसञ्चयः ।
रहसि प्रियेण रचितं नतभ्रुवो न समापदिष्ट सरसं नखव्रणम् ।।६६।।

हसिताधरोष्ठरुचिकारिणि स्फुटं नवपुष्पपल्लवभरे समुद्धृते ।
तनुकोमलेन वपुषैव केवलं वनिताजनं वनलता व्यडम्बयन् ।।३७।।

नवपुष्पपल्लवभरे समुद्धृते तरवः परामुपययुः समुन्नतिम् ।
उपयातवत्सु विभवेषु रिक्ततामुचिता ननु स्थितिरसौ महात्मनाम् ।६८।

प्रतिदिनमिव भूयः प्रीयमाणावरोधः
सचिवमशिवहेतुं मानिनीनां स्मरस्य ।

---

1. 'रन्' ख.

उपहिततरुवल्लीवातशोभं गुणैः स्वै–
रकृत वनविहारैरक्षतार्थं वसन्तम् ।।६९।।

इति मूषिकवंशे सप्तमः सर्गः

अष्टमः सर्गः

अथ जगदशिवप्रतापलक्ष्मी–
रनुसृतशुक्रमुरुक्रमं दधानः ।
असुरपतिरिवोद्यतो नितान्तं
क्षुभितमरुत्प्रसरो निदाघकालः ।।१।।

अधिपतिरनपायिनां वसूनां
प्रसवशरासनहन्तुरात्मभूतः[1] ।
स्फुटविकसितपद्मकोशजातो
रविरभजन्तरवाहनस्य काष्ठाम् ।।२।।

प्रसरमुपचितो निशागमस्य
ज्वलति रवौ दिवसः कृशीचकार ।
उपचयमुदयत्यनन्तराणा–
मलघुनि मित्रबले न कः क्षिणोति ।।३।।

स्वयमखिलजगद्भवाय सृष्टाः ।
पुनरिह कालगतेर्विपर्ययेण ।

---

1. 'भीत':

चरम इव पुमान् प्रजाः प्रदीप्तो
दशशतरोचिरपः समाजहार ॥४॥

नभसि हुतभुजां नृपाहिताना–
मुदजिहताहुतिपाकपुण्यगन्धाः ।
दुरधिगमगतिं[1] निदर्शयन्त्यः
सरणिमिव त्रिदिवस्य धूमरेखाः ॥५॥

गगनतलविवर्तितैर्विरेजुः
क्षितिरजसां प्रचयैर्वनान्तवात्याः ।
जगदिदमुपरुन्धतां समन्तात्
पटकुटिका इव घर्मवासराणाम् ॥६॥

भृगुतनय इवाहितोग्रहेतौ
ज्वलति भृशं क्षपितार्जुने दवाग्नौ ।
बलवदुपनते प्रभञ्जनस्य
प्रबलभयैरिव पार्थिवैश्चकम्पे ॥७॥

तरुणतरुलतानिरुद्धतापा-
न्यनिलविकीर्णशिरीषकेसराणि ।
क्षणमपि जहिरे न निम्नगानां
पथिकजनेन तटाकसैकतानि ॥८॥

हृतजलपरिवृत्तपङ्कनिर्य-
च्चलशफरोत्कशकुन्तमण्डलानि ।

1. 'वि' क. ग.

अभिदधुरुदराणि पल्लवाना–
महरभितप्तवराहयूथकेलीः ।।९।।

दवदहनभयादभिद्रुताना–
मधिकपरिश्रमशुष्कदानलेखाः ।
उदितगुरुतृषोऽपि नाभिजग्मु–
र्वनकरिणामलयो[1] न गण्डभित्तीः ।।१०।।

कृतजवमनुपेतिरे मृगौघैः
पथि विजले मृगतृष्णिकानदीनाम् ।
अपि हरति मनस्विनां तिरश्चां
किमुत विवेकगतिं परा हि तृष्णा ।।११।।

प्रतिनवहरिचन्दनाङ्गरागः
सह वनिताभिरदभ्रहारगौरः ।
जलकणशिशिरेषु यन्त्रधारा–
भवनतलेषु जनो दिनान्यनैषीत् ।।१२।।

उपगतविपदां दवाग्नितापै–
रुदजिहत प्रथमाङ्कुरास्तरूणाम् ।
उदयति हि समुद्यता[2] कदाचिद्
बलमहता सहितोऽपि रूढमूलः ।।१३।।

प्रशमयितुमिवाधिकं दिशासु
प्रबलदिवाकरदीप्तिजं निदाघम् ।

---

1. 'मलिनो'–ग. 2. 'चिवलमभिहता' क–ग.

जगदिदममृतांशुरंशुजालै-
  रमृतजलस्रवशीतलैरसिञ्चत् ॥१४॥

ह्रदमभिविशतः क्षणं स्रवन्त्या
  मदकरिणो विजहे[1] तटान्तवासः ।
कथमपि नभसि स्थितैरमुत्र
  भ्रमरकुलैरभिचुक्रुशे शुचेव ॥१५॥

अविरलमलकेषु कुङ्कुमार्द्रा
  दधुरबला मुकुलानि मल्लिकानाम् ।
स्फुरदमलरुचां कुलान्युडूनां
  तिमिरलवप्रसरे[2]ष्विवास्तसन्ध्याः ॥१६॥

प्रतिदिशमतिकर्कशाः प्रकृत्या
  रजनिचरा इव किंशुकाः प्रसह्य ।
नवमुकुलपुटै[3]र्नखैरिवोग्रैः
  पथिककुलानि विदारयाम्बभूवुः ॥१७॥

दिवसकरकरप्रवृद्धतापो
  निभृत[4]जलश्जपलानिलप्रचारः ।
व्यधित परभृतानुपात्तमौनान्
  मुखरकपोतकुलो निदाघकालः ॥१८॥

खरतरहरिदश्वभानुदीर्णाः
  प्रविदधतः सरुतानिभानुदीर्णाः ।

---

1. 'कटा' क, ख. 2. 'स्तस' ख. 3. 'रिवापैः' ख. 4. [illegible] क-ग.

क्षितिधरधरणीरनूनपात-
श्वसनधुता न जहुस्तनूनपातः ।।१९।।

अथ मृदुतरकोमलाङ्गयष्टि
युवतिजनं ग्लपयत्यशीतरश्मौ ।
पयसि सह जनैः पतिर्नराणां
सुखशिशिरे सरितो विहर्तुमैच्छत् ।।२०।।

सपदि स नृपतिः सुरूढरागै-[1]
र्नरपतिभिर्मुदितैरनुप्रयातः ।
युवतिजनयुतो वनान्तसिन्धुं
ललितविहारसमुत्सुकः प्रतस्थे ।।२१।।

हयरथगजनाथसम्भृतेन
प्रमदवता पथि यानसम्भ्रमेण ।
अपहृतमनसा जनेन तीव्रः
क्षणमखिलेन विसस्मरे निदाघः ।।२२।।

स्फुटतरमबलासु कस्य नाम
प्रकृतिरुपैति विपर्ययं न पुंसः ।
यदधिकतपनोऽप्ययं निदाघः
सलिलकणैः सरसाः स्त्रियश्चकार ।।२३।।

पथि विषमतले पतिः प्रियायां
श्रमशिथिलैस्तनुसन्धिभिः श्रयन्त्याम् ।

1. 'सुरूढभोगैं' क-ग; 'सरू'-ख.

उपहितसकलाङ्गरोमभेद-
स्तपति रवावपि निर्वृतिं प्रपेदे ॥२४॥

श्रमजलकणिका: कराङ्गुलीभि-
र्मुखकमलात् सुदृशो निरस्यमाना: ।
धृतरुष इव तूर्णमूष्मभाज:
परिकुपितामभजन् विपक्षनारीम् ॥२५॥

मृदुतनुरलघुं परिश्रमं तं
कथमिव सा बत सोढुमुत्सहेत ।
भृशतरमधुनापि नाङ्गसादं
यदिह भवानतिकर्कशो जहाति ॥२६॥

प्रिययुवतिरतोत्सवैकचिह्नै[1]-
र्महिततरैरपि घर्मवारिभिस्ते ।
न तु कृतमुचितं हरद्भिरस्या:
स्तनतटसङ्गविलग्नमङ्गरागम् ॥२७॥

अभिनवदयितावियोगदु:ख-
ग्लपितमतौ सुखमत्र नासितव्यम् ।
ध्रुवमिति विरसा भृशं त्वयीमे
मुखमरुतस्तव दूरमापतन्ति ॥२८॥

इति सपदि सकाशमध्वखेदा-
दुदितपरिश्रमचिह्नमभ्युपेत्य ।
अपरयुवतिसङ्गमापदेशात्
परिहसितुं प्रियमङ्गना बभाषे ॥२९॥

1. 'चित्तै' ख.

अथ सुरभिसरोजगर्भरेणु-
प्रचिततरङ्गकणानुषङ्गशीतः ।
प्रमुदितकलहंसनादहारी
निकटगतो मरुदापगामशंसत् ॥३०॥

निबिडतरुशिखानिरुद्धपातै-
स्तपनमहोभिरदृष्टभूतलानि ।
उपनदि शिशिराणि[1] तापमुच्चै-
र्वनगहनान्यहरन् विलासिनीनाम् ॥३१॥

अथ पृथुतटपद्मरागधाम-
च्छुरितजलां विभुरापगामपश्यत् ।
अविरतपरिमृष्टगण्डशैलां
मदरचनामिव शैलनागभर्तुः ॥३२॥

शुचिदवमषिजालमेचकैर्या
सलिलपतेरभिसारिका जलौघैः ।
विलसति जलदागमप्रदोषे
विरचितनीलपटावकुण्ठनेव ॥३३॥

श्वसितपथतरङ्गभङ्गपात-
प्रचलितपद्मरजःकणानुविद्धम् ।
प्रतिमुखनिहितानना यदीयं
वनमहिषाः सलिलं समापिबन्ति ॥३४॥

विपुलतरशिलाविभङ्गकूट-
स्फुटितपयःकणजालकावृतानि ।

---

1. 'शिखराणि' ख.

हिमकणविसरं सदापि यस्या
न विजहतीव तटान्तकाननानि ॥३५॥

प्रतितनुविततिस्तुषारधाम्न-
श्चलदनिलोद्धतवीचिभङ्गदीर्घा ।
जलपटकलिता क्षपासु यस्या
मणिरशनागुणविभ्रमं बिभर्ति ॥३६॥

सरभसमभिसृत्य पाययन्तं
भ्रमवधूं मधु वीक्ष्य पद्मषण्डम् ।
प्रणतमपि पुरो विधूय यस्यां
सरुष इव व्यपयान्ति वीचिरेखाः ॥३७॥

अनिमिषकुलजुष्टमर्णवा (न्तं? त्तं)
हरिभयकम्पितनागसामिपीतम् ।
यदुदकममभिकाङ्क्षितं जनौघै-
रमृतसमाह्वयमर्थतो बिभर्ति ॥३८॥

नवमपि बहुभिर्युतं पयोभिः
क्षणमपि केसरिणं वनद्विपेन्द्रैः ।
विघटितपृथुकोशमिन्दिरायाः
पदमपि या कमलाकरं बिभर्ति ॥३९॥

उपयति जगदीश्वरे सकाशं
शशिकिरणोज्ज्वलकान्ति निम्नगायाः ।
परिशिथिलमिवांशुकं विरेजे
सपदि परिक्षुभितं विहङ्गयूथम् ॥४०॥

परिमुषितमहातपोपसर्गं
चटुलतरङ्गचलोत्पलाभिरामम् ।
अकलुषमथ वारि निम्नगाया
हरिणदृशामहरद् विलोचनानि ॥४१॥

पयसि चलदृशां तटान्तभाजां
प्रतितनवः स्फुटवीचिबद्धकम्पाः ।
अनुचितपृतनाभिपातशङ्का–
भयचकिता जलदेवता इवासन् ॥४२॥

चरणकिसलयैर्गतं हृतं नः
कलरणितं मणिनूपरैर्वधूनाम् ।
पदमुचितमि..........................
........द्भिरकूजि राजहंसैः ॥४३॥

अथ मथितविपक्षकुञ्जरेन्द्रे
करधृतपुष्करकान्तिभिर्वधूभिः ।
अवतरति विभौ करेणुकाभि-
र्द्विरदपताविव निम्नगा जगाहे ॥४४॥

सदृशतरमुदन्वतः कलत्रं
धरणिभृति प्रथितोन्नतौ प्रसूतम् ।
अभिभवति बलादनुत्तमेऽस्मिन्
सरिदुचितां प्रतिकूलतामगच्छत् ॥४५॥

युवतकुचतटैर्भुजैश्च यूनां
पृथुकठिनैर्बलवद्विलोड्यमाना ।

तटतरुलतिकास्तरङ्गहस्तैः
श्रमविवशेव सरित् समाललम्बे ॥४७॥

स्फुटमिदमुपशिक्षणाय भूयात्
क्वणितविधौ कलहंससारसानाम् ।
युवतिचरणनूपुरैर्जलान्तः
सह रशनाभिरितीव नोशिशिञ्जे ॥४७॥

प्रथिततरमिवोपमानभावं
युवतिजनस्य दृशोर्हरन्त्यमी नः ।
नियतमिति विघूर्णिते निजवन-
श्शफरगणाः सलिले नवोत्पलानि(?) ॥४८॥

स्तनभरमबला पयोनिगूढं
चिरमपि नावृणुत च्युतोत्तरीयम् ।
अधिकतरसरित्प्रसादलब्धं
प्रियनयनप्रस.........(तापवृत्तम्?) ॥४९॥

प्रियतमकरयन्त्रवारिधारा
युवतिमुखान्तविसर्पिणी विरेजे ।
.........................कापतन्ती
तुहिनरुचेरिव बन्धदीर्घरश्मिः(?) ॥५०॥

कुवलयदल.................ग्रन-
परिश्रमगाढन...........हानात् ।
निबिडकु...............नां
परिलघुतामधिकं पयस्ययासीत् ॥५१॥

..................................—
शफरदृशस्तरसा यदम्बु दत्तम् ।
हृदयमकृत केवलं न तस्याः
प्रतियुवतेरपि तन्निरस्तरागम् ।।५२।।

प्रशिथिलचिकुरांशुकां युवानो
विमलजलोदरसर्पिणीं मृगाक्षीम् ।
सरित इव नृपस्य सेवनार्थं
समुपयतीमधिदेवतामपश्यन् ।।५३।।

प्रियमिव विहरद्विपक्षनारी-
कुचतटकुङ्कुमकेशपुष्पभाजम् ।
वरतनुरुपयान्तमूर्मिभङ्गं
परिहरति स्म परेण मत्सरेण ।।५४।।

विकसति सरसे न पद्मषण्डे
तटलतिकासु न पुष्पनिर्भरासु ।
अलभत सुदृशो निमग्नवत्या
रतिमलकच्युतिखेदि भृङ्गयूथम् ।५५।।

पटुरपि न सखीजनोऽनुनेतुं
सरसरुषं प्रबभूव यां चिरेण ।
स्वयमपि शफरीविघट्टितोर्वा
भयविवशं जगृहे तयासुनाथः ।।५६।।

अभिमुखमवसिञ्चति प्रिये यत्
क्षणमनमत् त्रपया मुखं नताङ्ग्याः ।

करसलिलमतः पपात नाक्ष्णो-
भर्वति स .... ॥५७॥

.... नियोगा-
....................नुबद्धपाणिपद्मा ।
न ....
....................भिरङ्गरागम् ॥५८।

मम कर.......................... ।
...............................या
दधति परिस्फुटतां
प्रिया.... .... ॥५९॥

............विपक्षवधूनखव्रणाङ्कः
.... ।
....
स्फुरदधरं दयितो रुषा बभाषे ॥६०॥

प्रिययुवतिमुपाहृतं निषेक्तुं
प्रतिवनितां प्रतिसंभृतां विलोक्य ।
दयितकरपुटे विशीर्णमम्भः
सममुभयस्य बभूव कोपहेतुः ॥६१॥

प्रशिथिलवसना विमुक्तकेश्यः
क्षतनवपल्लवलताश्च्युताङ्गरागाः ।
उपययुरबलाः पयोविहारात्
प्रियतमचित्तहरा (नि)तान्तलक्ष्मीम् ।६२॥

श्वासानुविद्धविधुतस्तनभारखिन्नाः
स्फीताङ्गसादविधुराः कुटिलालसाक्षीः ।
श्रान्ता विलोक्य तरुणीर्जलकेलिरागं
साधं नृपैर्नरपतिः शिथिलीचकार ॥६३॥

विप्रोषिताञ्जनगुणानि विलासिनीनां
लम्बालकाग्रपरिमृष्टजलारुणानि ।
नेत्राण्यदृष्टसुलभावसरां प्रियेभ्यः
काष्ठां वियोगविपदः कथयाम्बभूवुः ॥६४॥

इत्थं विहृत्य सलिले चिरमद्रिसिन्धो-
रुर्वी———…——————— ।
——…——————धं प्र ————
——…————…——————— ॥६५॥

……………………………प्रभापशङ्क
…………………………………………
…………………………………………
………………कुचेषु भूयः ॥६६॥

… …. …. …: विहृत्य प्रस्थितं धामनि स्वे
सममनुसृतवत्यः …..,समन्तात् ।
स्खलितगति यदूनां गोपकन्या इवेशं
कथमपि विनिवृत्तं भेजिरे वीचिरेखाः ॥६७॥

भङ्गान्यार्द्रैः करुरुहपदैरङ्गरागव्यपाये
दन्तश्छेदैर्दशनवसनान्युज्झितालक्तकानि ।

रागोद्भेदैः सपदि नयनान्यस्तकालाञ्जनानि
प्रापुः स्त्रीणामधिकरुचिरामन्यरूपामभिख्याम् ॥६८॥

प्रत्यग्रांशुकभासुरप्रविलसद्गन्धोत्सुकेशवली–
स्तब्धांभस्सरसादरो विरचितोष्वेकस्सुकेशावली ।
पातन्नातिचिरात् प्रदोषसमये काङ्क्षन्मधूपायति
श्यामानां स शिवाकृतिस्सललितं वर्गन्मधूपायति (?)
॥६९॥

इति मूषिकवंशे अष्टमः सर्गः ।

नवमः सर्गः

अभिभूय निजौजसाथ विश्वं
हरिदश्वः शनकैरवाप शान्तिम् ।
मथि.......................................
.... ॥१॥

परिजीर्यति ....
.... ।
....
..............पुण्य.................. ॥२॥

.... प्रताप–
....
.........................नस्य सद्यो
.... ॥३॥

.... पाटलिमा नमत्-
.... ।
....
....मूर्च्छितः शिखानाम् ॥४॥

प्रपतन् नभसा निबद्धपङ्क्तिः
..................यद्वनान्तराणि ।
समलीयत पत्रिणां समूह-
श्चलशाखेषु कुलायकोटरेषु ॥५॥

प्रसृतस्य जगत्समस्तमह्नां
महसां पत्युरविश्रमस्य पादाः ।
जलतामभिलोहितायमानाः
प्रबलादध्वपरिश्रमादिवापुः ॥६॥

शिखराहितमुत्कलङ्कदंष्ट्रै-
र्घनमुस्ताक्षतिगन्धभिन्नवातैः ।
उद(डी?ही)यत धूतकेसराग्रै-
र्बहलात् पल्वलकर्दमाद् वराहैः ॥७॥

परिपाटलकान्ति वासराणां
वपुरीशस्य विडम्बयाम्बभूव ।
मथनोद्धृतमन्दराद्रिधातु-
द्रवपातारुणितं मुकुन्दचक्रम् ॥८॥

कृतनादमुपेत्य संकुचद्भ्यः
कमलेभ्यो मधुपायिनो विसस्रुः ।

उपलब्धबला: क्षयादिवाह्नो
भुवनान्याक्रमितुं तमिस्रशैला: ॥९॥

अथ सान्ध्यमशोकताम्रमर्चि–
र्गगनाभोगविसर्पि निर्बभासे ।
क.... .... वासर... ....
क्षरितं भूरि मुखादिवास्रमुच्चैः ।१०॥

व्यभवन्नसमाकुलानुषक्तं
(न?वं) निरोद्धुं दयितं वियुज्यमानम्।
परिवर्त्य पुनश्चिराय कण्ठं
विरहार्ता विललाप चक्रवाकी ॥११॥

स्फुटसान्ध्यमयूखताम्रभाभिः
शिखरौघैर्धरणीभृतो विरेजुः ।
निजपक्षनिकर्तनोत्थमास्रं
दधतो लग्नमिवार्तिवेष्टनेषु ॥१२॥

प्रचिता इव धातुभिर्द्विपेन्द्राः
परितः पल्लविता इव द्रुमौघाः ।
नववारिवहा इव स्रवन्त्य–
स्ततभासा भुवि सन्ध्यया विरेजुः ॥१३॥

दिवसा.... .... क्षयोदयस्य
ज्वलतः सान्ध्यमयूखजालवह्नेः ।
घनमण्डलनीलकान्तिरुद्य–
न्नवहद्धूमविलासमन्धकारः ॥१४॥

तमसां रुरुधुस्ततः प्रताना
घनसन्ध्याकपिशान्तमन्तरिक्षम् ।
कनकांशुपिशङ्गितं सुमेरोः
कटकं बद्धघटा इव द्विपेन्द्राः ।।१५।।

प्रविलीनसमस्तजन्तुजातं
मुषिताशेषविशेषमागतान्ध्यम् ।
प्रचिते तमसि स्वकालयोगात्
प्रकृतौ विश्वमिव क्षणं विलिल्ये ।।१६।

प्रविहाय मुहुर्निपीतसारं
परिणामे मुकुलीभवत् सरोजम् ।
प्रचितासवगन्धभारमन्त–
र्भ्रमरी कैरवकुड्मलं प्रपेदे ।।१७।।

उडुपङ्क्तिरथोद्यती हिमांशो-
रुदयं नातिचिरेण सूचयन्ती ।
निपुणेव सखी शुचं रजन्याः
श्लथयामास शनैःशनैस्तमिस्रम् ।।१८।।

शिथिलीभवति क्रमात् तमिस्रे
... .. गगनेषु ..... कान्ताम् ।
प्रविचित्य समाह्वयन् समन्ता(त्)
परिचुक्रोश भृशं रथाङ्गनामा । १९।।

कुमुदोदरपाण्डराथ तन्वी
शतमन्योर्दिशि चन्द्रिका चकाशे ।

शिशिरांशुफलोदयैकहेतुः
कुसुमश्रीरिव शर्वरीलतायाः ॥२०॥

सरसं परिधूय पक्षपाली-
गलदम्भोबरजःकणं चिराय ।
उचितां नलिनीपलाशशय्यां
सह दारैरभजन्त राजहंसाः ॥२१॥

प्रचलादथ पूर्वतोयराशे-
र्वपुरिन्दोरभिताम्रमुन्ममज्ज ।
अपराब्धिनिमग्नमम्बुयात्रा-
शमितोत्तापमिवाशु सूर्यबिम्बम् ।२२।

दलिताञ्जननीलमन्धकारं
प्रसरन्ती शशिनो नुनोद दीप्तिः ।
अतिमात्रविवेकलाभहेतुः
परिमोहं गुरुमुज्ज्वलेव विद्या ॥२३॥

उभयं विषयस्वभावभेदा-
ज्जनयत्येव मिथोविरुद्धमेकः ।
शिशिरद्युतिरोषधीषु वह्निं
शशिकान्तेष्वसृजद् यदम्बुधाराम् ॥२४॥

उदयारुणचन्द्रिकादवाग्नि-
क्षपिताशेषतमिस्रकाननान्ते ।
उडुभिर्गगने सरद्भिरुच्चै-
र्ज्वलदङ्गारकणद्युति प्रपेदे ॥ २५॥

प्रणयात् प्रतिबोधितो नलिन्या
   भ्रमराणां घटया निषेव्यमाणः ।
प्रसृतैः कुमुदाकरो दलाग्रै-
   र्बहलामोदवहो मुमोच निद्राम् ॥२६॥

अवहत् कुमुदोज्ज्वलः प्रदोषः
   कुसुमेषोश्चलतो जगद्विजेतुः ।
शशिमण्डलमंशुसूचिमुक्ता-
   गुणसन्तानमिवैकमातपत्रम् ॥२७॥

गलितोदयरागशुभ्रभासः
   स्फुटतां लक्ष्म हिमद्युतेरियाय ।
अधिकं हि समेष्यति प्रकाशं
   विशदानामिह देहिनां कलङ्कः ॥२८॥

विषमेष्वतिसं(हृतः? हृतं) क्षितीनां
   सुदुरुच्छेदमनाभिमुख्ययोगात् ।
व्यपनेतुमिवान्धकारमुस्रै-
   रमृतांशुर्गगनान्तमारुरोह ॥२९॥

विकचोत्पलपत्रजालनीलं
   विपुलं लक्ष्म हिमाद्युतिर्बभार ।
स्फुरदंशुनिपातनष्टशेषं
   शरणप्राप्तमिवान्धकारलेशम् ॥३०॥

प्रहरन्ति जगत्सु रूढवीर्या
   विभवेन ध्रुवमावृता विपक्षम् ।

शशिना जगति प्रकाशितेऽयं
विजयायास्त्वमधत्त पुष्पकेतुः ॥३१॥

यमुनाह्रदभीषणं वधूनां
हृदयं मन्मथमाधवो विलोड्य ।
क्षपितोग्रवयोविषाग्निजालं
तरसा मानफणीन्द्रमुन्ममाथ ॥३२॥

अमृताम्बु न केवलं हिमांशु-
र्ध्रुवमन्तर्विषमप्यसौ बिभर्ति ।
यदयं सुखयन्नशेषलोका-
नदहत् प्रोषितभर्तृका मयूखैः ॥३३॥

अधिकां श्रियमाननेन्दुभासा
हरतीयं खलु नः सरोरुहाणाम् ।
अभितेपुरितीव गात्रलग्ना
विरहार्तां युवतिं मृणा(ल)भङ्गाः ३४॥

उदितादिव वल्लभस्य दूता-
दथ निश्चित्य तदागमं हिमांशोः ।
उपचक्रमिरे स्त्रियो विधातुं
प्रतिकर्माणि समागमोचितानि ॥३५॥

विशदं घनचन्दनानुलेपान्
बिभरामास विलासिनीललाटम् ।
विजयाद्विकलीकृतं हिमांशुं
कृतसम्मानमिवाननाम्बुजेन ॥३६॥

शशिना शशलक्ष्मकर्बुरेण
भ्रमरालीशब(रे? ले)न चाम्बुजेन ।
वदनं वलितभ्रुवोऽनुचक्रे
कृतकालागरुपङ्कपत्त्रभङ्गम् ॥३७॥

अधरे श्वसितोष्मदाहकृष्णे
परिकोपारुणिते च नेत्रयुग्मे ।
सफलत्वमलक्तकाञ्जनाभ्यां
दयितालक्ष्यमलम्भि मानिनीनाम् ॥३८॥

हरिचन्दनपङ्किलान्तरस्य
स्फुटमुक्तागुणभूषणाचितस्य ।
पृथुलस्तनमण्डलस्य तन्व्या
रुचिरो न प्रशशाम यौवनोष्मा ॥३९॥

शिथिलं प्रियसंगमे दुकूलं
कथमस्माभिरिहावलम्बितव्यम् ।
पटुभिः सुदृशामितीव नीवी-
गलनक्षोभरवैर्जगाद काञ्ची ॥४०॥

लटहे गतिभाजि हंसकाभ्या-
मुपशिक्षामिव कर्तुमागताभ्याम् ।
तरुणद्रुमपल्लवाभिरामं
प्रमदायाश्चरणद्वयं परीये ॥४१॥

उपकृत्य न मण्डनानि नूनं
विनिबध्नन्ति वधूजनस्य शोभाम् ।

परिपाटलकान्तिषु प्रकृत्या
दधुरेताश्चरणेषु येन लाक्षाम् ।।४२।।

उपपत्तियुतैरवीतकोपा
मधुरैर्मानवती सखीवचोभिः ।
शिशिरे चलति प्रदोषवायौ
प्रियदूतीवदने चकार दृष्टिम् ।।४३।।

प्रियमाकृतिलक्षितप्रसादा
सुतनोरप्रहता जगाम दूती ।
वचनादनवस्थिताद् वधूनां
ननु भावः परमिङ्गितं प्रमाणम् ।।४४।।

प्रणये हि दुनोति मौनवृत्ति-
(न्त?स्त)दसौ मूर्ध्नि पदाभिताडनीयः ।
कितवं तमिहानय त्वमस्मा-
दिति दूतीमसृजच्छलेन काचित् ।।४५।।

युवतिर्विहितागसे न भूयः
करुणार्थं दयिताय संदिशन्ती ।
प्रविलोक्य सखीं पतद्भिरास्रै-
रभिमानस्य चकार तोयदानम् ।।४६।।

परिपाटलता दृशोरमुष्या
विरहोत्थेन निशि प्रजागरेण ।
स्फुरति ध्रुवमश्रुरोधयत्ना-
दयमाप्यम्बुजकोमलोऽधरोष्ठः ।।४७।।

श्वसितं भृशमायतोष्णवातं
प्रियचिन्ताप्रसरेण नेर्ष्ययेति ।
परिशङ्क्य रुषं विवेद सद्यः
प्रियदूती सुदृशो मुखप्रसादात् ॥४८॥

गलदश्रुनिबद्धकण्ठदेश-
स्खलितैर्भ्रूगतिपूरितैर्वचोभिः ।
प्रहितास्मि तयेति कापि दूती
दयितं शोकमदाकुलं चकार ॥४९॥

सहसा ददती समानभङ्गं
हृदयेनालिखितां प्रियां वियुक्ताम्(?)।
प्रहितापि तया समेत्य चक्रे
दयितस्य प्रियमप्रियं नु दूती ॥५०॥

उपकर्णयतश्चिरं पुरस्तात्
स्ववियोगार्तिसमुद्भवान् विलासान् ।
प्रियतामगमत् प्रियस्य सान्द्रः
सुतनोरावृतदृष्टिरश्रुपातः ॥५१॥

प्रणते पदयोरुपेत्य पत्यौ
कृतकाविष्कृततीव्रमत्सरायाः ।
गतवत्यवशं हृदि प्रमादं
प्रमादाया दृशि रूक्षता न तस्थौ ॥५२॥

सपदि श्लथकुन्तलान्तरीय-
प्रतिबन्धाकुलहस्तमुत्थितायाः ।

सहसोपगतस्य पत्युरासी-
दुपचारः सुदृशो विहस्ततैव ॥५३॥

परिलङ्घिततुङ्ग(राग)मानां
तरुणीमावसथं गतां प्रियस्य ।
निकटे गुरुसाध्वसाम्बुपूरैः
परिपूर्णेव नदी रुरोध लज्जा ॥५४।

प्रगयेन तया सकृत्प्रसन्नं
परिकोपादध(र)ा धृतान्यशोभम् ।
मुखमीक्षितुमिच्छसि प्रियायाः
प्रकटं यत् समुपैषि मत्सकाशम् ॥५५॥

अपि चागसि लक्षिते प्रकोपः
कलहाः सन्नतयश्च पादमूले ।
कलितश्च सखीजनेन सन्धि-
र्मिथुनानामिति वृत्तयो विनोदाः ॥५६॥

इयता कृतमत्र गच्छ कान्तां
यदि सा गाढतरं व्रजेदमर्षम् ।
अथ दुर्विषहैस्तवानुतापैः
परिखिद्येत सुखोचितं शरीरम् ॥५७॥

प्रियमित्यपरा परानुरक्तं
परिल(क्ष्य)ारचिताञ्जलिं पुरस्तात् ।
परिकोपकषायितैरविध्यद्
भिदुरभ्रूयुगभीषणैः कटाक्षैः ॥५७॥

पथि चापभृतानुबध्यमाना
सभयेव स्मरपारिपन्थिकेन।
उपसृत्य विकम्पवद्भिरङ्गै-
रपतद् वक्षसि पत्युरायताक्षी ॥५९॥

परिरम्भसुखान्तरं विधातुं
दयितस्येव वियोगतप्तमूर्तेः।
परया शिशिरैः प्रमोदबाष्पै-
र्निरवापि स्तनभारयौवनोष्मा ॥६०॥

प्रणिपत्य सरोषयावधू(तं?तः)
प्रियया कान्ततमस्तथा चुकोप।
अनुतप्तधियो यथा तमस्याः
प्रियसख्यश्चकिताः समं प्रणेमुः ॥६१॥

पादप्रणामेऽत्यवधीरितानां
पुंसां पुरा यः समवाप भङ्गम्।
स्त्रीणां पुनः प्रत्यभिसारणेषु
मानः स एष द्विगुणीबभूव ॥६२॥

ध्यान्धकार इव भाभिरुदस्यमान-
मुद्वेलयन् मदनमम्भ इवाम्बुराशेः।
भावान् निशाकरमणीनिव भामिनीना-
मार्द्रीचकार जगदेकशिवः शशाङ्कः ॥६३॥

इति मूषिकवंशे नवमः सर्गः।

दशमः सर्गः

प्रश्चोतद्बहलसुधावृतैः कराग्रैः
शीतांशोरथ हृदयेषु निर्वृतस्य ।
उच्छेदश्रुतमिव कामिनो विधातुं
मारान्गेर्मधुसलिलानि पातुमीषुः ॥१॥

सम्प्राप्ते तरुणजने मधुव्रतानां
सन्तानैर्विरहितपूर्णशीधुकुम्भा ।
बभ्राजे बृहतिकयापि नीलभासा
विश्लिष्यत्कुचकलशेव पानभूमिः ॥२॥

प्रक्षोभं भृशमिव कामिनो विधातुं
सव्याजं हृदयमनुप्रवेष्टुकामः ।
शीतांशुर्मधुचषके निपीयमाने
संक्रान्तप्रतिवपुषा समाबभासे ॥३॥

द्राघीयान् मधु ददतः प्रियस्य हस्तो
बिभ्राणः पृथु चषकाननं विरेजे ।
उत्सर्पन्नहिपतिरिन्दुबिम्वशङ्का-
मालम्ब्य ग्रसितुमिवाननं तरुण्याः ॥४॥

कान्तेन प्रतितनुमप्यवेक्ष्यमाणां
भिन्दानां मधुनि मुखस्य पीयमाने ।
अप्रौढा परचषकं करेण काचित्
सव्रीडा सपदि विकम्पयाम्बभूव ॥५॥

ह्रीमत्या वदनपुटान्तरात् तरुण्या
नादातुं रतिगुरुरासवं विषेहे ।
आयस्यन्नदलितकुड्मलान्नलिन्या
राजीवान्मधुमिव मङ्क्षु राजहंसः ॥६॥

आताम्रं मणिचषकं निजप्रभाभिः
सान्द्राभिः स्फुटपरिपूरितान्तरालम् ।
मन्वाना मधुभरितं प्रगृह्य बाला
वैलक्ष्यं परिहसति प्रिये (जगाहे) ॥७॥

संक्रान्तस्फुटमुखगन्धमूर्मिभिन्नं
निःश्वासैः कलुषितमोष्ठयाविकेन ।
कान्तं(याः?य) प्रचलितषट्पदं समन्तात्
प्रायच्छन्मधु तरुणी निपीतशेषम् ॥८॥

सोत्कम्पं मणिचषके धृते रमण्या
लज्जन्त्या प्रतिवपुषा गतः शशाङ्कः ।
वीचीषु प्रतिपदमालुठन् सुरायाः
संमार्जन्मलिनमिवाङ्कम बभासे ॥९॥

आपीतान्यनवरतं मधूनि यूनां
भूयोऽपि व्यधिषत भूयसीं पिपासाम् ।
अभ्येति स्फुटमुपभोगतो विवृद्धि
निर्हाणं (ननु) विषयेषु नाभिलाषः ॥१०॥

संसेकान्मधुसलिलस्य कामिनीना-
मुद्भेदं समुपयतो मधुद्रुमस्य ।

उत्सर्पन्नतिबहुलो मुखेन्दुरागः
संरोहत्किसलयविभ्रमं बभार ॥११॥

कुर्वन्तः सुकृतमसंशयं परेभ्यो
गृह्णन्ति प्रतिकृतमञ्जसैव लोलाः।
स्वच्छायामरुणनिभे विधाय शीधौ
तच्छायां युवतिदृशो यदाशु जहुः ॥१२॥

योषाणां युवजनहारि वर्तमानं
मत्तानामिव ललितं विडम्बयन्त्यः।
रागेण स्फुटमुदितेन भिन्नवर्णा
भारत्यः प्रतिपदमस्खलन् वधूनाम् ॥१३॥

संमूर्च्छन्मदकपिशे मधुन्यसक्तं
रामाक्षप्रतिवपुषी विघूर्णमाने।
संभ्रान्तश्चलदरुणोत्पलाभिशङ्की
विश्रान्तिं मधुकृदनुद्रवन् न लेभे ॥१४॥

कुर्वाणः कुपितमहेतुकं रमण्या
यद् वाच्यं मधुमदविभ्रमो बभार।
प्रक्रान्तेष्वनुनयसंभ्रमेषु गोत्रं
भिन्दानो दयिततमस्तदुन्ममार्ज ॥१५॥

कान्तानां हृदि चिरसंयतो मदस्य
प्रोद्भेदे कपिशितगण्डमण्डलस्य।
आलानं दृढमिव मा(गमस्य? धवोह्य) मानो
ह्रीबन्धं मनसिजकुञ्जरो बभञ्ज ॥१६॥

उद्भिन्ने मदतरुणातपे सरागे
विच्छेदं व्रजति शनैस्त्रपान्धकारे ।
उत्सर्पन्नयनजलानि मन्दमन्दं
मुग्धानां विचकसुराननाम्बुजानि ॥१७॥

अङ्गानि व्यतिकर(र)विह्वलानि कुर्व-
न्नव्यक्तां गिरमलसान् कटाक्षपातान् ।
ह्रीभङ्गान्मदिरदृशां जगत्सु रूढं
निर्वादं स्वामिव मदोदयो ममार्ज ॥१८॥

प्रस्वेदैं रुचित (रति)श्रमात्समुत्थैं-
रानिन्ये युवतिमुरःस्थलं विलासी ।
अम्भोधेः सपदि समुद्धृताममुक्तां
वैकुण्ठः श्रियमिव दुग्धवारिलेशैः ॥१९॥

दीर्घाभ्यां दृढमुपगूहतो भुजाभ्यां
प्राणेशो हृदयमिवाखिलं ग्रहीतुम् ।
व्याभुग्नं कुचयुगमण्डलं प्रथीयो
विस्तारं समधिकमानशे तरुण्याः ॥२०॥

आश्लिष्टान्निजहृदयात् प्रियेण गाढं
बभ्राजे गलित इवाशु चित्तरागः ।
....
.... ॥२१॥

कान्तेन प्रकृतकचग्रहेण लज्जा-
शालीनं रहसि शनैः समुन्नमय्य ।

रुन्धत्या मुखरितशङ्ककं कराभ्यां
मुग्धाया मुखकमलं समाचुचुम्बे ॥२२॥

भव्यानां महिततमा भवन्ति पुंसां
सम्पद्भिर्ध्रुवमिव सम्पदोऽनुबन्धाः ।
दष्टोष्ठो दयिततमः स्तनोपपीडं
प्रेयस्या प्रबलरुजा यदालिलिङ्गे ॥२३॥

निर्दष्टे भृशमधरे प्रसह्य यूना[1]
मानिन्या परिहृतये तदुत्तरस्य ।
सावेगं प्रविधुतहस्तपल्लवाग्रं
सीत्कारं प्रबलरुजापि नैव चक्रे ॥२४॥

उद्गाढे मुहुरुपगूहने विषक्तं
काश्मीरद्रवसरसे कुचान्तराले ।
कान्तेन स्मरविवशेन कृष्यमाणं
कान्तायाः परिगलितं स्तनोत्तरीयम् ॥२५॥

साकूतं दयिततमे स्पृशत्युदग्रं
हस्तेन स्तनयुगलं हृतोत्तरीयम् ।
उत्सर्पद्विकृतविलासपत्त्रभङ्गो
रोमाञ्चः समजनि कञ्चुकी रमण्याः ॥२६॥

संरुद्धे विगलितनाभिमूलसीमा ....
पाणिभ्यां मदिरदृशः प्रियस्य हस्ते ।
तद्भावं स्वयमिव जानती पुरस्ता-
द्दत्ताय प्रशिथिलतामवाप नीवी ॥२७॥

---

1. 'यूनां' ग.

वस्त्राणां युवतिजनस्य बन्धमोक्षा-
दुद्वेल रतिरसरागमागतानाम् ।
निर्वाणं निरतिशयं बभूव पुंसा-
माश्चर्यं क इव स एष मुक्तिमार्गः ॥२८॥

कान्ताया दयिततमस्य गोत्रभेदाद्
विस्रस्ते रतिरसभाजि रागबन्धे ।
संरम्भः सरभसमुल्ललास पश्चात्
प्रागेव स्फुटमुदियाय मानलज्जा ॥२९॥

उद्भिन्नैः श्रमजलबिन्दुभिः समन्ता-
न्मुक्तानामनुसदृशैर्विलोभितानि ।
उद्दामे रतिललितोत्सवेऽपि सद्यो
नावापन्नखकरजांसि कामिनीनाम् ॥३०॥

मुग्धाया रतिललितेषु संवरीतुं
मूर्च्छद्भिः सह मणितानि चाटुवादैः ।
वैयात्यात् परिहरतेव नूपुरेण
व्यालोला सह रशना[illegible]शिञ्जैः ॥३१॥

संरम्भात् प्रविधुतमाल्यदामभूष
विच्छिन्नक्रममनवेक्षितान्तरीयम् ।
ह्रीभङ्गादनिभृतभावमर्थयुक्त
मुग्धस्त्रीसुरतमियाय मोहनाद्यम् ॥३२॥

प्रियनयननिरोधे दीपनिर्वापणे च
प्रतिविचयविधौ वा विस्मृतस्यांशुकस्य ।

1. स्तृ—क.

रतिविरतिषु मुग्धा लज्जया विस्फुरन्त्या
  क्वचिदपि तरलाक्ष्यो नालमासन् विहस्ताः ॥३३॥

सरभसरतिरागभ्रष्टभूषाकलापे
  वपुषि मुदितकान्तप्रेक्षणीयं बभूव ।
श्रमजलकणजालस्थूलमुक्तानुविद्धं
  करजदशनचिह्नं भूषणं कामिनीनाम् ॥३४॥

स्रस्तैर्गात्रैः श्रमसमुदयाचूर्णितैरीक्षणान्तै-
  र्वक्त्राम्भोजैः श्वसितविधुरैर्बद्धघर्माम्बुलेशैः ।
प्रालम्बन्त प्रचुरचिकुरोद्वान्तपुष्पोपहारे
  मध्ये बाह्वोर्लुलितशयने पल्लवानां रमण्यः ॥३५॥

स्वेदोद्भेदस्नपितवपुषां जालमार्गावतीर्णै-
  राकृष्टानां कुमुदसरसीबन्धुभिर्गन्धवाहैः ।
प्रौढायासप्रशिथिलभुजस्रस्तकण्ठग्रहाणां
  चक्रे निद्रा पदमथ शनैः कामिनामीक्षणेषु ॥३६॥

अथ दिशि निजसन्निधौ प्रतीच्या
  अभिमुखतामुपयाति शीतरश्मौ ।
गलदविरलबाष्पवारिधारा
  रजनिरागात् परिवृत्तिमीर्ष्ययेव ॥३७॥

पृथुरनतिसमुज्ज्वलप्रकाशः
  स्थगिततनुर्मृगलेखया महत्या ।
पथिकजनदृशां सुखावलोको
  रजनिकरः परिणाममाजगाम ॥३८॥

क्षीरोदवारिधवले शयनेऽथ सुप्तं
प्राबोधयन्नुषसि वन्दिगणा नरेन्द्रम् ।
पर्जन्यकालविर(तो?तौ) ललितैर्वचोभि-
राद्यं पुमांसमिव तुम्बुरुनारदाद्याः ।।३९।।

व्युष्टिं निशा व्रजति देव विमुञ्च शय्या-
मुत्तिष्ठतो दिवसकृत्यसमुद्यमेन ।
पत्युः पतत्रिविरुतैररुणः पुरस्ता-
दुत्सारयन्निव तमः पदमादधाति ।४०।।-

व्यालीढः प्रतिनवया रुचारुणस्य
ज्योत्स्नायाः स्फटिकशिलाकृतिः प्रतानः ।
उत्सर्पन् नयनभुवस्त्विषा कृशानो-
राभाति प्रमथपतेरिवाट्टहासः ।।४१।।

कूजद्भिस्तव सहसा प्रभाततूर्यैः
सावेगं हरिणदृशः प्रबोधितायाः ।
संत्रस्ते हृदि विरहव्यथावतारात्
सन्नो नु स्फुटमुदितो नु पुष्पकेतुः ।।४२।।

प्राभातिकोऽयमनिलः प्रतिबोधभाजां
सद्यः परागनिकरैर्नवमालतीनाम् ।
प्रत्यातनोति ललितप्रमदाजनस्य
भ्रष्टं रतिव्यतिकरेष्विव वा(त?स)चूर्णम् ।।४३।।

मथनसमयमुक्तैर्धातुभिर्मन्दराद्रेः
स्फुटपृषतनिपातद्रावितैराविलस्य ।

स्फुरदरुणपरीतो यात्ययं दुग्धसिन्धो-

स्तुहिनरुचिकरौघस्तुल्यरूपामवस्थाम् ॥४४॥

प्रश्च्योतद्वहलमदा(म्बु)जातपङ्के

शय्यान्ते(भृश)परिवर्तिनो गजेन्द्राः ।

सादृश्यं द(ध)ति निकृत्तपक्षतीनां

भूभागे परिलुठतां शिलोच्चयानाम् ॥४५॥

निद्रावशेषशिथिलैर्नयनैः प्रबुद्धं

क्षिप्तं पुरो रचितपङ्क्तिषु मन्दुरासु ।

प्रोथाग्रसम्भृतममी विलिहन्ति शष्पं

निश्वासभिन्नत्विचयं मुहुरश्वसङ्घाः ॥४६॥

महती वियद्विटपिनः समुद्गते

तरुणप्रवालरुचि सान्ध्यरोचिषि ॥

(वि)कृतो गलत्यमृतदीधितिस्त्विषां

परिणामपाण्डुरिव पत्रसञ्चयः ॥४७॥

प्रतपन्त्युपस्थितवियोगकातरं

प्रियकण्ठलग्नमधुना वधूजनम् ।

क्षणदावसानपिशुनैः स्वनैरमी

कृकवाकवः प्रमदयन्ति बन्धितम् ॥४८॥

स्फुरदविरलसन्ध्याधातुरागाभिताम्रः

स्फुटतरमृगलेखादानकल्माषिताङ्गः ।

प्रतिचलितकराग्रं कुञ्जराणामिवेन्द्रः

परिणमति शशाङ्कः साम्प्रतं पश्चिमाद्रौ ॥४९॥

उद्वीक्ष्य प्रथमतरं प्रियां विबुद्धा-
मुद्बन्धन्नत् कुपितकषायितायताक्षीम् ।
अज्ञाय स्वकृतमसंशयं विलासी
स्वप्नान्तर्गतमिव वेत्ति गोत्रभेदम् ।।५०।।

प्राप्ते दशां हिमरुचौ परिणामलोलां
बाल्यान्मुहूर्तमरुणेऽप्यविरूढमूले ।
आक्रामति क्षितितलं क्षणमात्तशक्तिः
छिद्रागमेन लघुरप्ययमन्धकारः ।।५१।।

गगनसरसि गाढे चन्द्रिकाम्भःकणाभै-
रुडुभिरभिनिकीर्णैः सर्वरात्रं विहृत्य ।
त्रिदशगज इवेन्दावुत्तरत्यद्य सद्यः
प्रसरति धुतपूर्वध्वान्तशैवालजालम् ।।५२।।

समुन्मिषद्भ्यो नयनान्तरेभ्यः
शनैर्विनिर्याति जनस्य निद्रा ।
विकस्वरेभ्यो नलिनीपुटेभ्यः
परम्परेवाद्य मधुव्रतानाम् ।।५३।।

आरादप्युषितवतोरसन्निधानं
शर्वर्यामिह परिवृत्तिमागतायाम् ।
अव्यक्तं व्रजति परस्परस्य भूया-
नाक्रन्दः श्रवणपथं (रथाङ्ग)नाम्नाम् ।।५४।।

भ्रमरनिचयनीलां लक्ष्मरेखां दधानं
निपतति गगनान्तात् साम्प्रतं भूमिभागे ।

मणिचषकमिवेन्दोर्मण्डलं पीतवारु–
ण्यरुणितनिजभासा यामवत्या निरस्तम् ॥५५॥

निद्रापवर्गविशदायतलोचनान्त–
मुद्युक्तमाश्रयितुमाननपङ्कजं ते ।
उद्घाटितान्युदरमास्थितयेव लक्ष्म्या
पर्युन्मिषत्युषसि पङ्कजकुड्मलानि ॥५६॥

विपाटलाभैरुषसोऽद्य रोचिषा
क्रमेण निद्रा कुमुदैरवाप्यते ।
प्रजागरादिन्दुविहारजन्मनः
कुमुद्वतीनां कलुषैरिवेक्षणैः ॥५७॥

गाढोपगूहनविधौ गरुडाग्रजस्य
रागोद्धतस्य दलिते सति रात्रिसूत्रे ।
प्रत्यग्रकुन्दमुकुलप्रकराभिरामा
मुक्ता इव प्रविगलन्ति दिवोऽद्य ताराः ॥५८॥

प्रत्यग्रकिंशुकरुचावरुणांशुजाले
संमज्जती परिवृतोडुसखीजनेन ।
अस्तं प्रयात्यमृतरोचिषि भर्तरि स्वे
दीप्तं हुताशनमिवाविशति त्रियामा ॥५९॥

आविर्भवत्यमलविद्रुमपाटलाभा
छाया सहस्रकिरणस्य नवा पुरस्तात् ।
पूर्वाद्रिशृङ्गवनराजिरियं समन्तात्
पर्युल्लसत्किसलयेव यया विभाति ॥६०॥

रमणविरहखिन्ने सन्निवृत्तेन भर्त्रा
पुनरुषसि समेते पद्मिनीचक्रवाक्यौ ।
चिरतरसहवासप्रीतियोगानुरूपं
समगतसुखदुःखं सख्यमेते दधाते ।।६१।।

प्रतिहतिमुपयातेष्वद्य दीपाङ्कुरेषुं
प्रविलसति दिनानामीश्वरे दीप्तिरुच्चैः
प्रलयममृतरश्मौ कालयोगादुपेते
प्रतिवसति च कान्तिः पुण्डरीकोदरेषु ।।६२।।

अथ शिखरतटादपश्चिमाद्रेः
स्फुरदरुणं प्रथमाङ्कुरोद्गमस्य ।
रविवपुरवदार्य रात्रिकोशीं
दिवसतरोरिव बीजमुज्जिहीते ।।६३।।

अनुकृत्य तवासत्कृतप्रयत्नं
चरितार्थोऽमृतदीधितिर्बभूव ।
अनुकर्तुमसावुदेति भास्वा-
नुरुतेजःपरिदीप्तमाननं ते ।।६४।।

इति कथयति वन्दिनां गणे
व्यतनुत कृत्यमहर्मुखोचितम् ।
परिसरति कुले पतत्रिणां
तरणिरिवोच्चलितो धरापतिः ।।६५।।

पूर्वागतैर्नृपतिभिर्विततं समन्ता-
दास्थानमण्डपमगाहत मूषिकेन्द्रः ।

नक्षत्रजालविचितं धृतमण्डलश्री–
रत्यायतं तुहिनरश्मिरिवान्तरिक्षम् ।।६६।।

धर्मार्थकृत्यमधिकं समये विधाय
क्रीडारसेष्वभिरतः सह कमिनीभिः ।
पुष्णन् प्रजा नियमिताः सदृशं पथि स्वे
दीर्घं दधौ स नृपतिः सकलां धरित्रीम् ।।६७।।

सम्पत्ति मनुजविलासिनीगुणानां
भुक्त्वेति क्षितिवलये चिराद् विरक्तः।
संप्रापद् त्रिदिवमसौ शिवो नरेन्द्रः
स्वर्गस्त्रीसुरतसुखान्तरेच्छयेव ।।६८।।

इति मूषिकवंशे दशमः सर्गः

एकादशः सर्गः

अथ तस्य भुजाद् राज्यमुग्रो जग्राह तत्सुतः ।
शेषो महावराहस्य पोत्रादिव भुवस्तलम् ।।१।।

त्यागशौर्यान्यस्तस्मादाधारे श्लाघ्यतां ययुः ।
प्रधानानां प्रधानः स गुणनादगुणोऽभवत् ।।२।।

भार्गवो नयमार्गेषु विक्रमेषु त्रिविक्रमः ।
अम्भोनिधिः स गाम्भीर्ये त्यागे नाकद्रुमोऽभवत् ।।३।।

स चक्रवालशैलान्तमेकच्छत्रेण भूपतिः ।
वीर्येण भुजयोः स्वैरमुवाह धुरमुर्वराम् ।।४।।

अनुद्भवात् स शत्रूणामभग्नरणदोहलः ।
सुरसाह्यविधौ दैत्यभुजकण्डूमजीहरत् ।।५।।

अस्त्रैः स हत्वा देवानां पूर्वदेवानगोचरान् ।
अधरीकृतगीर्वाणश्चक्रे मर्त्योत्तरं जगत् ।।६।।

तयैव यात्रया स्वर्गे विश्रान्तः स महीपतिः ।
चिरार्जितानां पुण्यानामक्षयं फलमानशे ।।७।।

पुत्रस्तस्योग्रधन्वेति क्षत्रलोकशिखामणिः ।
मित्रचन्द्रो बभारैकच्छत्रचिह्नामिमां क्षमाम् ।।८।।

कदाचित् तं प्रजाः सर्वा दृष्ट्वात्युग्रमव(ग्रहम्) ।
धरण्याः पतिमापन्नाः शरण्यं शरणं ययुः ।।९।।

चिक्षेप कोपादह्नाय मेघान्मोघप्रसर्पिणः ।
चापयष्ट्या निहत्यासौ पारावारस्य वारिणि ।।१०।।

भयादथ पयोभारभरितश्यामलोदराः ।
पयसा पूरयामासुः पृथिवीं पृथवो घनाः ।।११।।

निरंहाः सिंहसेनस्य हस्ते न्यस्य जितद्विषः ।
पुत्रस्य धात्रीं संन्यस्य तपस्यायै वनं ययौ ।।१२।।

सिंहसेनस्ततः सिंहैर्विनीतैरश्वकर्मणि ।
..........र्थं बन्धाय चक्रे विक्रमवद् बलम् ।।१३।।

बभ्रे.........................पूर्णसमद्युतेः ।
पुत्रेण तस्य वृत्रारि..............चन्द्रवर्मणा ।।१४।।

बिभ्राणे यत्र भूभारं निर्भारमुदित..................।
..............भोगी राज्यभारं फणीश्वरः ॥१५॥

पक्षच्छेदाय मैनाक.......................... ।
अनुबध्नन् पयोधौ स जगृहे बडवाग्निना ॥१६॥

........हत्सुतस्ततस्तस्य बिभ्रत् राजा महद् बलम् ।
धा....................पात्रीचक्रे निजौ भुजौ ॥१७॥

उत्साहो.........................स्सचिवो नयः ।
कलत्रे सदृशे लक्ष्मीरुर्वी चार्णवमेखला ॥१८॥

तस्यानुजो निजं राज्यमुग्राश्वस्तदनन्तरम् ।
...............जस्यात्मजे कृत्वा बृहत्सेनो वनं ययौ ॥१९॥

निपात्य स रणे शत्रून् क्षपात्ययरविभ्रमः ।
स्वभुजेन हृतां दीर्घां बुभुजे सकलां भुवम् ॥२०॥

तद्वंश्येषु तदन्ते च व्यतीतेषु सहस्रशः ।
आक्रान्तैः केरलैः कोलं कूलं तदपि मृत्युना ॥२१॥

अथोग्राश्वश्चिरं कालमचिन्त्ये तपसि स्थितः ।
वंशोच्छित्तिभयाद् भूयः कलत्री समपद्यत ॥२२॥

निरस्य केरलान् राज्यात् पुत्रं स्वं चित्रकेतनम् ।
प्राविशत् क्षत्रशार्दूलमभिषिच्य पुनर्वनम् ॥२३॥

अटव्यां स मृगव्यार्थी विन्ध्यस्यावन्ध्यपौरुषः ।
परिभ्रमन् क्वचित् सिंहात् प्राप व्यापत्तिमुत्तमाम् ॥२४॥

शतैः क्रतूनां कुर्वाणः शङ्कां गुर्वी शतक्रतोः ।
अनुप्राप्तः सुतस्तस्य शतसोमस्ततोऽभवत् ॥२५॥

स प्रतिष्ठापयामास ग्रामे चेलेरनामनि ।
कैलासाद्रिप्रतिच्छ(न्ने?न्दे) मन्दिरे चन्द्रशेखरम् ॥२६॥

ऊर्जितैरार्जितं यज्ञैरर्चनैश्च स धूर्जटेः ।
पुण्यं भोक्तुमगण्यानां स्वर्गं दुर्गमगाहत ॥२७॥

तत्सूनुरश्वसेनाख्यः सौख्यहेतुर्विपश्चिताम् ।
सिंहकेतौ सुते कृत्वा राज्यं प्रा(प्य?ज्य)मगाद् वनम् ॥२८॥

सत्पुत्रलाभसम्प्रीतः सपुत्रो विदधद् गुरोः ।
विश्वपाल इति ख्यातो विश्वमेतदपालयत् ॥२९॥

प्रयातः स्वरिपुं जेतुं वियातः समरेषु यः ।
वेणीभिर्बलरेणूनां वासरं धूसरं दधौ ॥३०॥

भौमासद्भिर्विशद्राज्ये न प्र ....सम्पदा
स्वर्गे वर्गेण चान्यत्र................निर्ममे (?)॥३१॥

बाल्यात् प्रभृति पुत्रोऽस्य शर्मदत्तो महामतिः ॥
तपःसमाधिना देवं वीरमानर्च धूर्जटिम् ॥३२॥

स कदाचिज्जटाबन्धमुग्धशीतांशुशेखरम् ।
साक्षाच्चक्रे विरूपाक्षं प्रसादस्मेरलोचनम् ।।३३।।

प्रणिपत्याशु भक्त्या स चोदितो वृषकेतुना ।
इष्टमायुर्मम स्यादित्ययाचत वरं परम् ।।३४।।

शङ्करस्तु भवद्वंश्यास्त्वत्प्रभृत्येकविंशतिः ।।
इष्टायुषो भविष्यन्तीत्यतिप्रीत्या वरं ददौ ।।३६।।

चिरं भुक्तां श्रियं न्यस्य स्वपुत्रे रुद्रवर्मणि ।
आप त्रैलोक्यनाथस्य सालोक्यं वृषलक्ष्मणः ।।३६।।

रुद्रवर्मतनूजोऽथ भद्रचेता नृपो दधौ ।
व्याघ्रसेन इति ख्यातो दीर्घमेनां वसुन्धराम् ।।३७।।

ततो नाम्ना पृथुद्युम्नस्तस्य पुत्रो धारापतेः
बभार मौषिकीं राजा लक्ष्मीं ल[illegible]गसन्निभः ।।३८ ।

पृथुद्युम्नस्य दायादो मायादोषहरो नृणाम् ।
धात्रीमेकातपत्रेण वज्रधारश्चिरं दधौ ।।३९।।

तनयोऽमुष्य विख्यातविनयोऽथ वलाहकः ।
स्वनयोपात्तयोः पात्रमनयोः श्रीभुवोरभूत् ।।४०।।

ततः क्षितीश्वरोद्वाहधीरबाहुरगाहत ।
पन्थान..............भीमवर्मा क्षमाभृताम् ।।४१।।

मनुजोपप्लवध्वंसी तनुजो भीमवर्मणः ।
जगत्सेना भयं शत्रोर्बृहत्सेनोऽप्यजायत ॥४२॥

बृहत्सेनस्य विख्यातः सूनुः शर्वपराक्रमः ।
पार्थिवीं बिभरामास दक्ष इत्यक्षतां श्रियम् ॥४३॥

ततो निःशेषदिक्चक्रगीयमानगुणोन्नतिः ।
अतुलः पृथुलोरस्को दक्षसूनुरजायत ॥४४॥

अथाशेषजगद्भागप्रतीतबलपौरुषम् ।
अतुलो जनयामास तनयं नयवर्धनम् ॥४५॥

कीर्तिल(क्ष्म्या)थ तत्सूनुः कार्तिकेयपराक्रमः ।
मित्रसोमो जितामित्रः प्रजापतिरजायत ॥४६॥

ततश्च प्रमदानेत्रषट्पदाम्भोरुहाननः
मित्रसोमस्य सोमश्रीर्भद्रो नाम सुतोऽभवत् ॥४७॥

अब्धिसीम्नो भुवः पत्युरपत्यं तस्य भूपतेः ।
वीरवर्माभवद् वैरिवीरवर्मविभेदनः ॥४८॥

अथाशेषनृपोत्तंसलालिताङ्घ्रिसरोरुहः ।
शतक्रतुसमस्यास्य पुत्रोऽभूदमितक्रतुः ॥४९॥

ततो रणमुखाकृष्टचापज्याघातबन्धुना ।
बभार बाहुदण्डेन जगदश्वो जगद्धुरम् ॥५०॥

लेभे लोभादिभिर्दोषैरस्पृष्टादां(श)मुद्भवम् ।
जगदश्वात् सुरद्युम्नः प्रद्युम्न इव केशवात् ॥५१॥

ततश्चार्जुनवर्माणं सुरद्युम्नो महीपतिः ।
तनयं जनयामास जयन्तमिव वृत्रहा ।।५२।।

विस्मारितजनाबाधात् तस्मादर्जुनवर्मणः ।
उग्रबाहुरुदग्रासिव्यग्रबाहुरजायत ।।५३।।

उग्रबाहोरथामुष्मात् समग्रबलपौरुषः ।
जगत्प्रियो जयादित्य इत्यजायत भूपतिः ।।५४।।

जयादित्यस्य दायादो नवादित्यपराक्रमः ।
रिपुसेना (नाटवी) टवीवह्निर्वृतसेनोऽप्यजायत ।।५५।।

वत्सराणां सहस्र........................क्वा ।
इष्टमायुरमी सर्वे शर्वदत्तान्वये ययुः ।।५६।।

उत्पलाक्षो महाकीर्तिर्देवद्युम्नो बृहद्द्युतिः ।
उग्रो मनुर्बृहद्ग्रीव इत्यभूवन् नृपाःक्रमात् ।।५७।।

ततः समस्तभूपालमौलिलालितशासनः ।
राजा वटुकवर्मेति बृहद्ग्रीवसुतोऽभवत् ।।५८।।

यूपैर्व्याख्यापयामास निखातैरभितो मखान् ।
कीर्तिस्तम्भैर्यशोमूर्तिराहवाद् राघवोन्नतिः ।।५९।।

मुष्टिर्यस्य धनुर्यष्टिन्नीतिं यस्य समुद्वहन् ।
सर्वमण्डलजां लक्ष्मीमेकीचक्रतुरात्मनि ।।६०।।

स चकार शुभाकारो भक्त्या मुक्त्यागमार्थया ।
आलशुद्धि (मनुंप्रा)प शाश्वतं वटुकेश्वरम् ॥६१॥

प्रतिष्ठां प्रापितो यत्र वरिष्ठेन महीभृता ।
कैलासवासं नाद्यापि स्मरति स्मरशासनः ॥६२॥

कोटिं पाटितशीतांशुक्षरितैरमृतैरिव ।
श्वेतिमानं विमानस्य यत्र पश्यन्ति मानवाः ॥६३॥

अम्लानकुसुमोत्तंसैरनिमेषनिरीक्षणैः ।
यत्र मित्रैर्वृतः शम्भुर्देवैः सेवागतैरिव ॥६४॥

पुण्यपूरैरिवागुण्यैः पुंसां घटितमूर्तयः ।
त्रिसन्ध्यमुपगायन्ति यत्रेशं वेशयोषितः ॥६५॥

नाट्यशाला नटद्रामा यत्रोच्चैर्मुरजारवैः ।
गर्जकैरिव मेघाली (भाति) लोलशतहृदा ॥६६॥

बलितूर्यध्वनैर्यत्र वञ्चिताः प्रतिवासरम् ।
अभिनन्दन्ति नोद्यानशिखिनो घनगर्जितम् ॥६७॥

लीलापद्मा विशेषेण लोकं हस्तेत लालयन् ।
आसीदहीरणो नाम भूपतिस्तदनन्तरम् ॥७८॥

पृतनासरितस्तीरे पश्चिमे पृथिवीपतिः ।
अहीरणेश्वरं नाम धाम चक्रे स शूलिनः ॥६९॥

अहीरणसुतो राजा महीं रणभराह्वयः
अपालयदपाकृत्य कृपालयमना नृपः ॥७०॥

दाहो यस्य प्रतापेन छेदः कौक्षेयलेखया ।
अहरन्माननागोत्थं राज्ञां रोषविषं महत् ॥७१॥

सन्धाय गजबन्धाय मतिं मतिधनो नृपः ।
बभ्राम जातु सह्याद्रिमधिरुह्याटवीषु सः ॥७२॥

तत्र च क्वचिदाकृष्टः कन्यानामाननेन्दुभिः ।
प्रवेशं मदनस्यान्तर्विवेश विपुलं बिलम् ॥७३॥

बिलकन्यासहस्रेण विहृत्याहानि कानिचित् ।
ततो निन्ये स ता राज्यमुपयुज्य रसायनम् ॥७४॥

रसायनबलध्वस्तजरामरणविप्लवः ।
योषासहस्रशोऽनिन्द्यवेषाभिर्व्यहरच्चिरम् ॥७५॥

हत्वा जन्येषु राजन्यान् गत्वा साम्राज्यमूर्जितम् ।
कृत्वा स यज्ञानर्थिभ्यो दत्त्वा कामान् यशः पपौ ॥७६॥

इष्टमात्राणि वर्षाणि भुक्त्वा लक्ष्मीं भुजार्जिताम् ।
सह ताभिः सुते जाते स भूयो बिलमाविशत् ॥७७॥

आर्मगुप्तस्य तत्सूनोर्वीर्यगुप्तमहीतलः ।
अचलो नाम पुत्रोऽभूद् राजा राजीवलोचनः ॥७८॥

स्वसारमहिमाक्रान्तकुबेरपुरवैभवम् ।
एलिशैलसनीडे यश्चकाराचलपत्तनम् ।।७९।।

जज्ञे यज्ञेन गीर्वाणान् प्रीणयन् पृथिवीपतिः ।
अश्वसेनाह्वयः सूनुरचलस्याचलोन्नतेः ।८०।।

अश्वसेनं ततो राज्यादवरुध्य विशां पतिः ।
आसीद् विक्रमसेनाख्यः कनीयानस्य भूपतिः ।।८१।।

पुत्रो विक्रमसेनस्य चक्रपाणिसमो दधौ ।
ख्यातो विनयवर्मेति धर्मेण धरणीमिमाम् ।।८२।।

ततश्चतुरकूपारपर्यन्तपृथिवीपतिः ।
राजवर्मा सुतो जज्ञे राजा विनयवर्मणः ।।८३।।

चित्रैरभ्रंलिहा[भ्रै?ग्रै]र्यः प्रासादैरुपशोभितम् ।
विह[ारं]राजनामाङ्कश्चक्रे रत्नत्रयास्पदम् ।।८४।।

पुत्रस्ततोऽश्वसेनस्य दण्डमादाय पाण्ड्[ि]तः ।
प्रत्यासीदत् स्वकं राज्यं जयमानी [ज]गतपतिः ।।८५।।

रणमानीतवेतालगणगीतपराक्र[मः] ।
रणमानी ततो जज्ञे तनयो ज[न?य]मानिनः ।।८६।।

तस्मादुदयवर्मेति विस्मापितजनो गुणैः ।
अजायत पतिर्भूमेर्द्विजायुतमहातिथिः ।।८७।।

भूमिपालस्ततः श्रीमान् कामपालपराक्रमः ।
उदयादित्य इत्यासीत् तस्मादुदयवर्मणः ॥८८॥

विरोचनतनूजश्रीर्विरोचन इवापरः ।
विरोचनः क्षितेरासीत् ततो राजा विरोचनः ॥८९॥

निहत्य पल्लवं संख्ये महत्यसुहरे नृणाम् ।
जहार हारिणीं सोऽस्य कन्यामन्यामिव श्रियम् ॥९०॥

राज्यभारं भुजे यस्य न्यस्य सर्वं सुदुस्सहम् ।
तस्यावहद् गणो राज्यमाज्ञाभारमहर्निशम् ॥९१॥

विरोचनस्य पुत्रोऽभूद् विरोचनसमाह्वयः ।
कालसेनस्ततस्तस्माद् व्यालसेनोऽप्यजायत ॥९२॥

शत्रुन्तपो बृहद्बाहुः पृथुकीर्तिरमित्रजित् ।
द्विपानीकश्च तत्रासन् कुले भूपतयः क्रमात् ॥९३॥

द्विपानीकस्य पुत्रौ द्वौ शशिदत्तजनव्रतौ ।
राज्यहेतोरुभौ संयत्यन्योन्यं तौ निजघ्नतुः ॥९४॥

अन्तर्वत्नी तदा पत्नी शशिदत्तस्य मागधी ।
प्रसूय पुत्रं सेना....सानाथ्यमकरोद् भुवः ॥९५॥

स वज्रसारः सह पौत्रकेण
राज्येन जातं सुतमाप शूरम् ।
शूरस्य विख्यातगुणो विशाल-
स्ततो महस्वानजितस्ततोऽभूत् ॥९६॥

तस्याथ राज्ञस्तपनोग्रधामा
पुत्रोऽभवत् पुष्कलनामधेयः ।
बभूव चास्माद् बहुकीर्तिनामा
ततः सुकेतुर्विकटस्ततोऽभूत् ॥९७॥

..............................सुधन्वा
सत्यव्रतश्चतुरकेतुरुदारकीर्तिः ।
स्वर्भानुरुत्तम[क]लः सकलोऽद्रिकेतुः
कामप्रदो नयधनः कविकर्कशश्च ॥९८॥

पर्जन्यः परमयशा निपातवर्मा
तीव्राश्वः सुमतिरमित्र(भा?हा) विचण्डः ।
अक्षोभ्यः समरसहो महोदयश्चे-
त्येतस्मिन् क्षितिपतयः कुले बभूवुः ॥९९॥

शिवचरितसमाख्यस्तत्सुतः पुत्रमापत्
सकलगुणसमाजस्थानमीशानसंज्ञम् ।
अभवदखिललोकोद्धूतिहेतोरमुष्मा-
न्नरपतिकुलकेतुः कुञ्चिवर्मा नरेन्द्रः ॥१००॥

इति मूषिकवंशे एकादशः सर्गः

द्वादशः सर्गः

अथ पृथुभुजवीर्योपार्जिताशेषभूभृ-
न्मुकुटमणिमयूखामृष्टपादाम्बुजन्मा ।
अभिषदवनिमेनामुद्धृतैकातपत्रं
जगति बुधजनानामश्चितः कुश्चिवर्मा ।।१।।

सकलभुवनबन्धोरुद्भवं सिन्धुभर्तु-
र्विबुधनिवहवन्द्यं दारभावं च विष्णोः ।
उरसि वसतिमुच्चैर्यस्य मन्ये चिरस्य
व्यगणयदुपलभ्य श्लाघनीयं न लक्ष्मीः ।।२।।

अपहृतनिजराज्यैर्यस्य विद्वेषिवर्गै-
रचलपतिषु रुद्धेष्वात्मनामास्पदेषु ।
दधति वनमुदीर्णं भेजिरे शून्यभावा-
न्मृगविततिभिरेषामीर्ष्ययेवास्पदानि ।।३।।

अविरलविसृतानामष्टकाष्ठान्तरेषु
स्वगुणमणिघटानामुल्लसन्त्येव दीप्त्या ।
अनुकृतशरदिन्दुज्योत्स्नया यः स्वकीर्त्या
व्यधित भुवनमेतद् भूषितं मूषिकेन्द्रः ।।४।।

अभवदमलकीर्तेरात्मजा तस्य काचित्
तदनु च कुलदीपः सूनुरीशानवर्मा ।
दधदिव विजिगीषुर्विक्रमं नीतियुक्तं
धरणिपतिरुभाभ्यामुच्चकैराबभासे ।।५।।

महति दुहितरं तामीश्वरे केरलानां
प्रथितयशसि कृत्वा राजलक्ष्मीं तनूजे ।
अपगतगुरुभारः पुण्यसम्भारमुच्चै-
रविशदुपदधानः स्थानमाखण्डलीयम् ।।६।।

अथ पितुरधिगम्य प्रोज्ज्वलां राज्यलक्ष्मीं
दिशि दिशि विलसद्भिः सद्गुणानां सहस्रैः ।
सकलजनमनोज्ञां चन्द्रिकां प्राप्य चन्द्रा-
दुडुभिरिव निशायाः सोऽवतारश्चकाशे ।।७।।

परिणयविधियोग्ये प्राप्तविद्यं कदाचिद्
वयसि कृतपदं तं वल्लभे मन्मथस्य ।
तदनुगुणकलत्रान्वेषणव्यग्रचेता
वच इति वरमन्त्री मन्त्रविद् व्याजहार ।।८।।

अधिवसति मयूरोत्पातमत्रैव राष्ट्रं
भृशतरमधिराजेनान्वितस्तद्भवेन ।
अविरहितकुटुम्बो विप्रवेषावलम्बी
स्वरिपुभिरवरु[द्ध]श्चेदिवंश्यो नरेन्द्रः ।।९।।

अनुपमगुणरूपा नन्दिनीत्यस्ति काचिद्
वयसि शिथिलबा(ले?ल्ये) वर्तमानास्य कन्या ।
चिरपरिचयशीलप्रेमबन्धात् सलेशं
स्वयमिव रिपुहस्तादागता राज्यलक्ष्मीः ।।१०।।

श्रियमति[शय]युक्तां लक्षणैर्जन्मयोगै-
रपि जगति दुरापैरात्मनः सूचयन्ती ।

परिणयविधियोगे सा भविष्यत्यलं ते
प्रतिहतिरहिताया जन्मभूमिः प्रजायाः ।।११।।

इति गिरमुपकर्ण्य श्रेयसी[म]र्थबन्धो-
रपि गलितसमृद्धेश्चेदिवंश्योन्नतस्य ।
पटुसचिवमुखेन श्लाघनीयान्वयस्ता-
मवृणुत वरकन्यामादरान्मूषिकेन्द्रः ।।१२।।

अथ जलधिरिवैनामम्बुजाक्षाय लक्ष्मीं
सुरभिरिव समृद्धिं कौसुमीं पार्थिवाय ।
भृशतरपरितोषं प्रादिशत् भूमिभर्त्रे
सकलजनमनोज्ञां चेदिराजः स्वकन्याम् ।।१३।।

प्रहितविपुलदण्डः प्राभृताधानतुष्टै-
रुपहितबलवाह्यस्तस्य सामन्तमुख्यैः ।
अघटयदतिदूरभ्रष्टया राज्यलक्ष्म्या
पुनरपि गुरुशक्तिं चेदिपं हेहयेन्द्रः ।।१४।।

स्वभुवमभिजिगीषुर्मूषिकेन्द्रो बलौघैः
सरथगजतुरङ्गैः सार्धमृद्धानुभावम् ।
चलितमचलितश्रीः केरलेन्द्रं पुरं स्वं
पुरमथनसमानः सोऽथ शुश्राव तावत् ।।१५।।

संनिशम्य सरुषस्तमुदन्तं
भूपतेर्मुखरिताद्रिगुहेन ।
तस्य यानपटहेन गभीरं
दध्वने कनककोणहतेन ।।१६।।

तद्ध्वनिं समुपकर्ण्य तदीया-
न्युत्सुकानि समरेण बलानि ।
प्रीतिमन्ति सकलान्यपि सद्यः
शात्रवाभिहतये समनह्यन् ॥१७॥

तस्य युद्धगमनोचितमुच्चै-
र्मन्त्रविद् व्यधित साधु पुरोधाः ।
सोऽपि शोभनतरे निजपुर्या
निर्ययौ परिजनेन मुहूर्ते ॥१८॥

आरुरोह करिणं स कुसुम्भ-
क्षोदपाटलकुथावृतपृष्टम् ।
सूदनाय रिपुभोगिकुलानां
मेरुश्रृङ्गमिव खेचरराजः ॥१९॥

आतपत्रमसितेतरमुच्चै-
रिन्दुवंशतिलकस्य बभासे ।
आहवे विजयमस्य विधातुं
बिम्बमागतमिवामृतरश्मेः ॥२०॥

भूभृतः स्वयमसेविषतैनं
चामरैरधिगताः सितभाभिः ।
तत्प्रतापदहनं रणहेतो-
रेधयन्त इव तत्पवनेन ॥२१॥

उत्पतन् जयतुरङ्गतरङ्ग-
स्तस्य हेतिशतभीमझषौघः ।

उच्चचाल बलवारिधिरुच्चै-
रारवः प्रचलचामरफेनः ॥२२।

क्षीरशङ्खपटहध्वनि गर्ज-
द्दन्ति भीमहयहेषितघोरम् ।
तद्बलं सुभटहुङ्कृतमार्ग
भीतविद्रुतपृथग्जन[मासीत्] ॥२३॥

....................कदलीक्रमुकानां
नालिकेरकलमान्तरितानाम् ।
आवलीः फलवतीः पथि पश्य-
न्नप्यलं न स तुतोष रुषान्धः ॥२४॥

तस्य भुक्तिशयनेष्वपि भव्ये-
ष्वादरः पथि बभूव न भूयान् ।
केरलाभिगमजृम्भितमन्योः
कः सहेत विभुरुन्नतिमन्याम् ॥२५॥

गन्धसिन्धुरघटाकृतभास्वत्-
सेतुबन्धसुखलङ्घितसिन्धुः ।
तं तमुद्धुरबलः स धराया
देशमाशु समलङ्घयदीशः ॥२६॥

यानदुन्दुभिरवध्वनिताशं
वाहिनीभरणनामितभूमिः ।
रेणुजालपिहितान्तरमुच्चै-
राससाद सरितं स परुष्णीम् ॥२७॥

तत्तरङ्गकणिकावलिशीतो
लोलमानकदलीवनबन्धुः ।
पूगसूचिपुटभेदनशीलो
भूपतिं सुखमसेवत वातः ॥२८॥

तामतीत्य सरितं निकषासौ
सन्निवेशमकरोत् पृतनायाः ।
बद्धकुञ्जरतुरङ्गमुदञ्चत्-
केतुमत् पटकुटीरमुदारम् ॥२९॥

केरलेन्द्रमपरेद्युरुपेतं
शुश्रुवानथ रणोत्सवहेतोः ।
आहवाय समनाहयदुच्चै-
र्वाहिनीमहितलोककृतान्तः ॥३०॥

मानसानि जयिनां[त?त्व]रयन्तः
संयुगाय पृथुभीमभुजानाम् ।
आनका[न्ध?श्च]पणवा जनयन्तो
दध्वनुः प्रतिबलश्रुतिशूलम् ॥३१॥

वाहनानि च समास्थिपत स्वा-
न्युर्वरापतिभिरुद्धतसत्त्वैः ।
अग्रणीषुरपि योद्धृतकैश्चित्
स्वोचितानि समरोत्सुकचित्तैः [?] ॥३२॥

बद्धतूणिकवचाः सशिरस्त्रा
मत्सरेण सममुद्यतशस्त्राः ।

सैनिकाः कमपि वेषमुदारं
साम्परायिकमधुर्युधि शौण्डाः ॥३३॥

वाहिनी रघुपतेरपि चैवं
सन्ननाह सहसा (भ? ह)वहेतोः ।
दुर्जयारिजयलम्पटचित्ता
दुःश्रवप्रतिबलानकशब्दा ॥३४॥

ते परस्परसमेतपदाति-
स्यन्दनेभहयसादिसमूहे ।
उद्यतायुधभुजे पृतने द्वे
सम्प्रहर्तुमभिसंववृताते ॥३५॥

धन्विभिः सममयोधि सचापैः
खड्गिभिः सह निशातकृपाणैः ।
केवलं न खलु साप्तपदीनं
वैरमप्युचितमात्मसमानैः ॥३६॥

कृष्टकार्मुकवरेण विमुक्तः
केनचित् स्वगलकर्तनकाले ।
अच्छिनद् द्रुतमुपेत्य पृषत्को
वैरिकण्ठमुपजातविशुद्धिः ॥३७॥

ऽत्करेण करिणोर्ध्वमुदस्तः
सासुरेव निपतद् वियतोऽधः ।
तस्य हस्तमलुनादसिनान्य-
स्त्यक्तभीतिरतिमात्रशितेन ॥३८॥

पार्श्वकीलितपृथूरुशराभ्यां
विद्विषोऽपि विनिपातितमूर्ध्नः ।
देहशेषमपरस्य रणोर्व्यां
नो पापत तुरगोत्तमपृष्ठात् ॥३९॥

निर्भयश्चिरमयुध्यत वीरो
यः परेषुभिरविद्धशरीरः ।
तं वरीतुमधिकोत्सुकचित्ता
स्वर्वधूरपगतासुमियेष ॥४०॥

सम्प्रहारशतलम्भितमोहं
योधिवीरमभयं विवरीषुः ।
अभ्यनन्ददमरावनतभ्रू-
रभ्यसूयत पुनः प्रतिबुद्धम् ॥४१॥

शोणिताम्बुकृतकर्दमिकायां
शातहेतिशतकण्टकितायाम् ।
साम्परायभुवि पत्तिनिकायैः
स्फीयते स्म हतहस्तिविताने ॥४२॥

ते....पत्तितुरगेऽथ परुष्णी-
मभ्युपेयुषि महारुधिरौघे ।
केवलं न पिशिताशिभिराशे
शिंशुमारनिकरैरपि तृप्तिः ॥४३॥

संयुगेषु रघुहेहयवीरा-
वायुगं बहुषु साधु रमेताम् ।

भारतेऽपि सुदुरापमियन्नः
क्रव्यजातमतिभूमि दिशन्तौ ।।४४।।

इत्युदीर्य पिशितैरशनायां
प्राशितैरशमयन् पिशिताशाः ।
भूरिशोणितपयोभिरुदन्या-
मप्यलं करपुटाहृतपीतैः ।।४५।।

मज्जमांसरुधिरैरुपयुक्तैः
खेचरा भुविचराश्च ननन्दुः ।
गृध्रजम्बुकमुखाः सुजनानां
कर्म घोरमपि लोकहिताय ।।४६।।

निर्गतासुगणनापटुचित्तः
कथ्यमानगतजीवितसंख्यान् ।
तृप्यति स्म पिशिताशनयूथो
नृत्यतः समवलोक्य कबन्धान् ।।४७।।

युध्यमानमनवेक्षितकायं
भिन्नपत्तिरथवाजिगजेन्द्रम् ।
निर्जिगाय पृतनाद्वितयं त-
न्नो परस्परमनाकुलसत्त्वम् ।।४८।।

दुर्विलङ्घ्यमितरेतरधाम्ना
तन्निशाम्य युगलं ध्वजवत्योः ।
केरलेन्द्रपृतनामथ बाणै-
र्विध्यति (स्म) कुपितो रणमानी ।।४९।।

भिद्यमानममुना विशिखौघैः
संविलोक्य बलमाकुलयौधम् ।
प्रत्यविध्यदरिसैन्यमसंख्यैः
पत्रिभिः प्रकुपितो जयरागः ॥५०॥

हन्यमानमितरेतरमुक्तै-
स्तद् ध्वजिन्युभयमायुधजालैः ।
दुर्गणं बहुतयाविलमासीत्
सद्य एव सु[गणाश्व?णं च] भटेभम् ॥५१॥

तावुभाविति परस्परहेति-
व्रातपातविरलीकृतसैन्यौ ।
द्वन्द्वयुद्धमतिमानुषसत्त्वौ
कर्तुमाहितमती समभूताम् ॥५२॥

जृम्भिताम्बुनिधिविभ्रमभाजो-
र्मध्य एव पितृमातुलयोः सः ।
सेतुबन्ध इव केरलकेतुः
प्रत्यदृश्यत तयोरथ गोदः ॥५३॥

ध्वस्तविश्वविपदोः क्षितिभर्त्रो-
रस्तु तावदनयोरविरोधः ।
अस्तशैलमवलम्ब्य हृतांशु-
स्तिग्मदीधितिरितीव तिरोऽभूत् ॥५४॥

अविरलशरवर्षाविग्रहत्वं प्रपन्ने
नरपतितनयेऽस्मिन् साम्परायान्निवृत्तौ ।

भुवनमवनिपालावन्धयत्यन्धकारे
सपदि बलनिवेशं स्वं स्वमेतावयाताम् ।।५५।।

तावन्येद्युः समरसुलभज्याकिणाकल्पभाजौ
शौर्याधारौ प्रकृतिवचना[स?त्स]ङ्गतौ बन्धुभूतौ ।
शान्तद्वेषौ पुनरुपचितप्रेमभारौ नरेन्द्रौ
लज्जां युद्धस्मरणजनितां सन्दधाते मुहूर्तम् ।।५६।।

भूयः प्राप्य प्रमुदितमनाः स्यालमाहूय कोलं
पृथ्वीपालः पुनरनुपमो लोकपालोपमानम् ।
सम्पन्नाभिर्गुरुतरमुदं सत्क्रियाभिः स चक्रे
नानारूपैर्जनपदजनैः प्राभृतैराहृतैश्च ।।५७।।

तत्रोषित्वा कतिचन निशा निर्ग[तैः?तः] सोऽथ मार्गे
तैस्तै[र्दैन्यै?र्देश्यै]रुपहृतमहातिथ्यसत्कार एव ।
कृच्छ्रात्तेन स्वयमनुमतः स्नेहनिघ्नेन राज्ञा
प्राज्यैश्वर्या सधृतिरविशत् स्वां पुरीं केरलेन्द्रः ।।५८।।

श्रियमकृतपराङ्गस्पर्शदोषां स पश्चात्
प्रभुरुचितमहिष्या निर्विशेषामशेषाम् ।
सुखमनुबुभुजे स्वां दीर्घबाहुः सुदीर्घं
दिनमनु कृतशम्भुप्रीतिरीशानवर्मा ।।५९।।

प्रणयपरवशात्मा लालयन् प्रेयसीं तां
श्रियमिव पृथुहस्तादाहृतां दीर्घकालम् ।
प्रभवमिह सुखस्य श्रेयसोऽमुत्र चान्यद्
धरणिपतिरपत्यं ना (शुभ?यम)स्यामविन्दत् ।।६०।।

व्यथितमतिरभावात् पुत्रलाभोत्सवस्य
श्लथितसकलभोगः श्लाघनीयान्वयस्य ।
सुबहुभिरभिरामां स्वैर्गुणैर्भूषिकाणां
पतिरथ परिणिन्ये कन्यकां चोलभर्तुः ।।६१।।

प्रथममथ नरेन्द्रः पश्चिमायां महिष्या-
मलभत नृपरामं सूनुमानन्दहेतुम् ।
निजविभवशिखायामुन्नतं कोमलायां
फलनिचयमिवोच्चैर्भूरुहः पारिजातः ।।६२।।

क्षितिचरदुरवापं रूपमम्भोधिसीमां
नृपविभवसमृद्धिं तादृशं प्रेम भर्तुः ।
इति सकलमपार्थं साथ मत्वा स्वगत्या
चिरमभजत पादौ नन्दिनी चण्डिकायाः ।।६३।।

प्रतिनियमविधानैर्वर्तमानैरजस्रं
क्षपिततनु भजन्ती सा चिरं भद्रकालीम् ।
कुशशयन (वि? नि) षण्णा सा क्षणं योगनिष्ठा-
निभृतकरणवृत्तिर्निद्रयेवाललम्बे ।।६४।।

अथ पृथुलकपर्दाबद्धमुग्धेन्दुगौरं
वपुरसिशुकहस्तं बिभ्रतीमभ्रनीलम् ।
प्रशमितनयनाग्रप्रीतियोगादुदग्रा-
मधिगतह (रि? र) वृक्षाम (म्बता? म्बिका) मभ्यपश्यत् ।।६५।।

महि [द? ष] वदनरक्तालक्तकाबद्धरागे
कमलजयिनि युग्मे पादयोरापतन्तीम् ।

प्रणयमृदु दधाना चित्तमुत्तिष्ठ वत्से !
त्वमिति सपदि दुर्गा नन्दिनीमन्वगृह्णात् ।।६६।

प्रमदकलिलभक्तिव्यक्तरोमोद्गमाङ्गीं
स्वकरकिसलयेनोत्थापितां संस्पृशन्ती ।
वरमभिमतमाशु त्वं वृणीष्वेत्यथैना–
मतिगुरुकरुणार्द्रं वाक्यमार्या बभाषे ।।६७।।

प्रतिपदमियमस्मद्वंश्यनारीसुतानां
क्षितिरवनिपतीना(म)म्ब! भूयात् स्वराज्यम् ।
पुनरिति निगदन्ती सापतद् भक्तिपूर्वं
प्रणतजनशिवायाः पादमूलं शिवायाः ।।६८।।

'प्रथितगुणमपत्यं सम्भविष्यत्यलं ते
क्षितिरपि च पुनः स्त्री(पुत्र)कृ(त्वास्त?त्या त)थैव' ।
इति गिरमुपकर्ण्य प्रेयसीमम्बिकासौ
कृतफल इव पुण्ये भोगसम्पत् तिरोऽभूत् ।।६९।।

प्रमदमथ विबुद्धा संविभज्य स्वभर्त्रा
गणमनतिचिरेण प्रीणयन्ती सखीनाम् ।
अलभत सुतमेकं नन्दिनी पालकाख्यं
दुहितरमपि काञ्चिद् दुःखविध्वस्तिहेतुम् ।।७०।।

करिकलभविलासं पालकं बालमेव
प्रियतरमभिरामैः स्वैर्गुणैरप्यसुभ्यः ।
निकटमतिदिदृक्षो(ः)प्रेषयामास धीर–
स्तनयमवनिपालस्त(न्य?स्य)मातामहस्य ।।७१।।

अथ निजभुजदण्डोपार्जितैरूर्जितश्री–
वसुभिरवनिपालस्तर्पयन्नार्थिवर्गम् ।
अतिबहुषु विमानेष्वग्रयायी बुधानां
स्वयमुपरचितेषु स्थापयामास शम्भुम् ।।७२।।

प्रबलचरणभक्ति प्रीतियोगेन सद्य:
स्वपदमुपनिनीषोस्त्र्यम्बकस्येव दूत: ।
भृशतरपरिमूर्च्छादा[व?ह]बन्धुर्ज्व(ल?र)स्तं
नृपतिमथ कदाचिन्निम्नवृत्तिं चकार ।।७३।।

विहितपुरजनाधिव्याधिनान्तेन सद्य:
शमित......पीड: पीडितो निर्व्यपेक्षम् ।
प्रथितमिह विधाय स्वै...हादानमूर्धै:
क्षितिपतिरथ काष्ठां कीर्तिशेषामगच्छत् (?)।।७४।।

पितरि दिवमुपेते पालकश्चे(ति?दि)संस्थ:
प्रकृतिभिरथ सद्य: प्रापितां राजलक्ष्मीम् ।
विपुलबलभुजोऽपि ज्येष्ठभावानुवृत्त्या
कथमपि नृपरामं रुद्धबुद्धिर्विषेहे [?]।।७५।।

स च भुवमभिरक्षन्नक्षताज्ञो रिपूणा–
मुपगतमिव मृत्युर्गोचरं लोचनानाम् ।
....
.... ।।७६।।

प्रथितपृथुयशोभिर्विक्रमाक्रान्तविश्वै:
स्वकुलनृपतिमुख्यैस्तेजसा सम्भृतेन

अशिपदवनिमेनामास्थितारिष्टशय्य:
कतिपयमथ कालं चन्द्रवर्मा नरेन्द्रः ।।७७।।

पितरि दिवमुपेते प्राग् दवीय:(कनीय:?)कनीय-
स्यखिलमलघु....ग्नाजसा जीवलोकम् (?)
प्रतनुरमृतभास: सोऽपि कालेन बाल-
श्चरम इव कलांशो जग्रसे चन्द्रवर्मा ।।७८।।

प्रकृतिसचिवमुख्यैर्भर्तृनाशे विपक्ष-
प्रतिहतबलवीर्यैः कृच्छ्रतो धार्यमाणा ।
उडुविजयितमिस्रा नष्टचन्द्रेव रात्रिः
समभवदतिशोच्या मौषिकी राजलक्ष्मीः ।।७९।।

खलजनपरिभूत(कृ?क्लि)ष्टवर्णाश्रमेऽस्मिन्
प्रतिदिशमवरुद्धे मण्डले शत्रुसैन्यैः ।
प्रकृतिसचिववर्ग: पालकाह्वानहेतो-
र्द्रुततरम(ति?धि)चेदि प्रेषयामास दूतम् ।।८०।।

परिभवमरिवर्गैः सन्निशम्य स्वभूमेः
स्फुटतरपरिकोप: कल्पितानल्पसैन्यः ।
प्रथितविपुलशक्तिर्निर्ययौ सोऽथ सद्यः
कृतपद इव मूर्धन्युद्धत: कृष्णसर्पः ।।८१।।

स्फुरदसिमुखमूर्च्छद्भास्कराभीशुजालै-
र्ज्वलितसकलदिग्भि: सेवि(तं?त:) सावनीभि:

पटुपटहनिनादध्वस्तदृप्तारिधैर्यः
प्रशमितजनशोकं तत्र (तत्?स)प्रादुरासीत् ॥८२॥

सपदि विहतभग्नाशेषविद्वेषिवर्गः
प्रकृतिसचिवजुष्टो वश्यसामन्तलोकः ।
समुचितमभिषेकं प्राप्य सम्यक् प्रजाना-
मधिगतविपुलश्रीः पालकः पालकोऽभूत् ॥८३॥

करितुरगपदा(न्ता?ति)व्यूहनिध्वानमूर्च्छत्-
पटुपटहनिनादह्रादि(ना?ता)शान्तराले ।
प्रचलविपुलसैन्योत्सर्पिभिर्भूपरागै-
रुपचितघनवृन्दैः सन्निरुद्धार्कतापे ॥८४॥

प्रतिबलभटचापोद्धूतमौर्वीनिनाद–
श्रवणकुपितवीराक्रान्तभीमाग्रभूमौ ।
अभिमुखशरजालोद्घट्टिताद् बाणपूगा–
ज्ज्वलितगगनमार्गे निर्गतेनानलेन ॥८५॥

घनपिशितविवादक्रुद्धगोमायुगृध्री–
कलनजनितहासोद्धूतवेतालनृत्ते ।
सुरयुवतिसमूहैः स्वर्विमानैश्च विष्वक्
समरनिहतवीरग्राहिभिर्व्याकुलाग्रे ॥८६॥

प्र[क?त]रणपरिखेदग्लानपादान्तजुष्ट-
द्विरदशवशरीरद्वीपरु[द्धस्य?द्धास्र]सिन्धौ ।
अमृतपतितवीरप्रेक्ष्यनृत्तैः परीते
दिविचरकृतगीतातोद्यकृत्यैः कबन्धैः ॥८७॥

प्रलयसमयमूर्च्छत्सागरारम्भघोरे
भुवनभयविधायिन्युद्धते साम्पराये ।
प्रबलमुपनिनाय प्रेतसर्वातिथेर्यः
सकलमरिममूहं सद्म वैवस्वतस्य ।।८८।।

पदमिव विवृतेर्ष्या स्वर्गभाजां परेषा–
मपरयितुमपास्य स्वानि भूमण्डलानि ।
समिति निहतशेषा यस्य रुद्धोडुमार्गा-
नधिरुरुहुरमित्राः शैलशृङ्गाग्रभागान् ।।८९।।

कृतवति पदमस्मिन् राज्ञि मृत्योः कटाक्षे
स्वसुरथ पृथुकीर्तिस्तस्य राज्ञस्तनूजः ।
अभवदभवहारी पूरिताशः प्रजानां
वलिधर इति तस्या वल्लभो राजलक्ष्म्याः ।।९०।।

पटुभिरिव दधाना भू[ति?रि]नक्षत्र(मे?मो)घैः
प्रथितरवपरीताशेषदिक्चक्रवाला ।
उपरि धरणिभर्तुस्तस्य तीव्रा कदाचित्
पुरजित इव गङ्गा प्रापत(न्?द्)गाङ्गसेना ।।९१।।

पृथुतरमवतीर्णे वासरे जीर्णभानौ
धरणिपतिरसह्यं सह्यशैलाग्रभागात् ।
द्रुततरमभिपत्य प्रत्यनीकं प्रदोषे
[वचन?पवन]इ[व]स[पू?वे]गस्तूलपुञ्जं बभञ्ज ।।९२।।

परिचितबहुशस्त्रः पारगो दण्डनीतेः
प्रतिहतरिपुवीर्यः प्रत्यनीकः शठानाम् ।

भरतनहुषकीर्तिर्भागिनेयोऽस्य राज्ञः
श्रियमथ रिपुरामः श्रेयसीमभ्यगच्छत् ।।९३।।

प्रसरचरितलोकं प्रौढनागेन्द्रमुच्चै-
र्विततमहृतपक्षैर्भूधराणां सहस्रैः ।
प्रतिबलमसिरुग्रो यस्य यादोधिभर्तु-
र्मुनिरिव महदम्भः कुम्भयोनिर्मुमोष ।।९४।।

व्रजति गतिममैर्त्यामीश्वरेऽस्मिन् जगत्याः
सपदि (तनु? तदनु) जन्मा जन्मभाजां पुरोगः ।
अभ[व? ज]दवनिचक्रेविक्रमोद्[घा? द्गी]तनामा
कृतमतिरथ रामः सोमवंशप्रदीपः ।।९५।।

प्रथितमिह जनस्य श्रीनिकेतं कदाचि-
न्मुषितजनविपत्तेरालयं मू(ल)(वा)सम् ।
पृथुचटुलतुरङ्गक्षुब्धवेलातटान्तः
कबलयितुमुदन्दानुद्धतं व्याजजृम्भे ।।९५।।

सपदि च तमुदन्तं सन्निशम्यात्तकोपः
परिभवमिव शत्रोरात्मनोऽनन्तरस्य ।
प्रतिजलधि स दूरादुद्यतासिः प्रतस्थे
न खलु जगति धीराः स्वस्य पश्यन्त्यभूमिम् ।।९७।।

प्रलय इव गभीरध्वानमुल्लङ्घ्य वेलां
विसृतचटुलवीचेरुत्थितस्यार्णवस्य ।
तुलितजलदशल्कैस्तूर्णमाबध्य सेतुं
बलवदुपलभङ्गैः स्तम्भयामास वेगम् ।।९८।।

असुकरमिति कृत्वा कर्म धर्मानुबन्धं
स्वपथनियमितानामादधानः प्रजानाम् ।
स बुधजनसहायं प्रोज्झ्य राजा पदं स्वं
विबुधजनसहायं स्थानमग्र्यं प्रपेदे ॥९९॥

पुनरपि भुजमध्यं प्राप लक्ष्मीर्मुरारे-
र्भुवनतलमशेषं तिष्ठति प्राप्य कीर्तिः ।
क्व पुनरसति तत्र त्यागशौर्यादिकान्नां
शरणमिह परेषां तद्गुणान्नैव विद्मः ॥१००॥

अथ मथितविपक्षः पक्षपाती गुणानां
शशधर इव भौमः कामिनीलोचनानाम् ।
प्रतिगतिरहिताज्ञं प्राज्ञसाधारणश्री-
रभजत जनमानी मौषिकीं राजलक्ष्मीम् ॥१०१॥

पुरविजितमुदस्य क्ष्मापतौ जीवलोकं
मखविजितममुष्मिन् प्रस्थिते लोकमन्यम् ।
अभृत निभृतचेता मेदिनीमर्णवान्तां
प्रतिहतरिपुसङ्घोपक्रमः शङ्खवर्मा ॥१०२॥

अथ वहति विभावभावमस्मिन्
नृपमकुटाग्रविघट्टिताङ्घ्रिपीठः ।
पुनरपि जयमानिनामधेयः
पुनरवहन्नृपतिश्चिराय कोलम् ॥१०३॥

उच्छ्रायि सालवलयं परितो[षि? हि]तस्य
खातं गभीरमरिभिः कथमप्यधृष्यम् ।
गाम्भीर्यमुन्नतिरिति प्रथयत्यमोघं
हेतुं परैर्द्वितयमेतदलंघ्यतायाः ॥१०४॥

पर्याकुले विलसति प्रधनापगाया-
श्छायागतं पयसि गोपुरमुन्नताग्रम् ।
भावस्य यत्र सकलस्य जगद्धिताय
प्रत्यक्षताम (पनयत्? गमयत्) प्रतिभङ्गलीलाम् ॥१०५॥

प्रासादा[:] पृथुधवल[ा] [नादव? घना]न्तराले
संख्याभिर्ध्रुवमनुकर्तुमक्षमत्वात् ।
नाकाशे मणिभिरुपस्कृतापि दीप्तै-
र्देवानां स्फुरति दिवा विमानपङ्क्तिः ॥१०६॥

उद्भूतव्यजनसितातपत्रचिह्नै-
र्भूरेणुव्यवहितवाहिनीसनाथैः ।
आकीर्णा धरणिभृतां गणैरजस्रं
या(ता? था)र्थ्यं न जहति यत्र राजमार्गाः ॥१०७॥

निःशेषदिग्वलयसारसमुच्चितेन
स्वस्यैव वित्तविभवेन न केवलेन ।
ईशस्य चाप्रतिमया बहुमानवृत्त्या
यत्र व्रजन्ति वणिजो धनदस्य कक्ष्याम् ॥१०८॥

हरिमणितटरश्मिध्वान्तरुद्धान्तराला-
मुपवनतरुजालैरावृतामावृताक्षैः ।

विरहभयविषण्णो यत्र सार्धं न वध्वा
  व्रजति रजनिशङ्की वापिकां चक्रवाकः ॥१०९॥

सम्पश्यन् युवतिमुखानि धूपवासा-
  नाजिघ्रन् मुहुरुपकर्णयन् महत्या ।
कामार्थो भृशमिव शेपादविद्धा...
  देवो न त्यजति न यत्र पुष्पधन्वा [?]॥११०॥

दुष्प्रापा जगति जनैरनल्पपुण्यै-
  र्माद्यन्त्यो महिततमान्मधूपभोगात् ।
आरोहन्त्यनिमिषलोचना यदन्त-
  र्भामिन्यस्त्रिदशवधूजनस्य काष्ठाम् ॥१११॥

कृतास्पदाः काननसत्त्वजातय-
  स्तपोभृतां सिद्धिमतामिवाश्रमे ।
जगत्प्रतीतातिविरुद्ध............
  स्सहाखिला यत्र वसन्ति देवताः ॥११२॥

शिरसि विदधद् राज्ञः श्लाघ्ये पदं विहतात्मना
  कृतपरिकरैर्नागैरुग्रैरनुज्झितविग्रहः ।
रिपुकुलपुरध्वंसी गृह्णन्नहीनगुणं धनुः
  शिव इव बभौ गां नाक्रामन्नसौ धरणीपतिः ॥११३॥

इति मूषिकवंशे द्वादशः सर्गः

त्रयोदशः सर्गः

अथ तस्य विभोरनन्तरो विजयी सद्गुणरत्नसागरः ।
बलभद्रसमानविक्रमो वलभो नाम बभूव पार्थिवः ।।१।।

वहति (स्म? स्व)भुजेन यत्र गां मुदिताः स्वैरगतौ गते भरे ।
हरिणा नियतं कुलाद्रयः परिकृत्तं निजपक्षमस्म[र]न् ।।२।।

असियष्टिमुरःस्थलेषु यः क्षितिपानां रभसादपातयत् ।
अमुना यदि संक्रमाध्वना श्रियमाक्रष्टुमिवाशु तद्गताम् ।।३।।

मकुटानि महीभृतोऽस्य ये पदयोर्नो चतुराणि चक्रिरे ।
मणिमत्सु महीभृताममी मकुटेषु स्वपदान्युपादधुः ।।४।।

रणदर्पविकस्वरेष्वलं मुखरा यस्य मुहुः शिलीमुखाः ।
वदनाम्बुरुहेषु विद्विषां पतिताः प्राणमधून्युपादधुः ।।५।।

स कदाचिदवन्ध्यपौरुषः कुपितो भूपतिरागसि क्वचित् ।
प्रचचाल भटस्थलीभुवः पतिमुन्मूलयितुं मदोद्धतम् ।।६।।

प्रयतोऽस्य महानकध्वनिः श्रुतिरोधाय बभूव देहिनाम् ।
अपराण्यपि मोहमृच्छतां करणानि द्विषतामपावृणोत् ।।७।।

बहुलो गगनस्थले वसन् बलरेणुप्रकरोऽस्य वीक्षितः ।
कलुषाणि विपक्षयोषितां नयनान्युश्रुजलैरपूरयत् ।।८।।

भरितां भयजातसम्भ्रमैरभिनिर्यं(स्त? द्भि)रितस्ततो जनैः ।
प्रलयानलभीषणोद्यमः प्रतिपेदे नृपतिर्भटस्थलीम् ।।९।।

प्रतिगर्जितुमक्षमैरलं पुरतस्तस्य पुरारितेजसः ।
परितो वनदुर्गमाश्रितैरभिनिर्यद्भिरथोपचक्रमे ।।१०।।

प्रबलेन बलेन भूभृ[तं?तः] प्रसभं भग्नबलास्ततोऽपि ते ।
प्रययुः सकलत्रबान्धवा निजराष्ट्रा[त्]तु भुवो महीधरान् ।।११।।

अपनुद्य ततस्ततो रिपून् स्वपरित्राणपरायणोद्यमान् ।
नृपतिर्निजवंशकेतवे नृपरामाय ददौ भटस्थलीम् ।।१२।।

विभवेन नयप्रतापयोर्दधदुर्वीमकृतार्थपौरुषः ।
स निनाय ततः कृतार्थतां फलयोगैः सुकृतस्य मानुषैः ।।१३।।

अनुजेन ततोऽस्य भूपतेरधरीकृत्य यशांसि भूभृताम् ।
धरणी वरदेन मौषिकी स्वसनाथाकृत कुन्दवर्मणा ।।१४।।

व्यथनैररिपङ्कजन्मनां कुमुदानामिव बन्धुभिः सताम् ।
किरणैरिव शीतरोचिषः ककुभो यस्य गुणैर्जगाहिरे ।।१५।।

अभिरक्ष्य भुवं चिराय यो विभवैर्न्यायवशादुपार्जितैः ।
व्यधित प्रथितं मुरद्विषो भुवि नारायणपूर्वकं पुरम् ।।१६।।

अथ तत्र नृपे यशोनिधौ स्मरणीयां गतिमभ्युपेयुषि ।
स्वसुरस्य सुतः स्मराकृतिः पृथिवीं पालयति स्म पालकः ।।१७।।

पृथुतेजसि तत्र चाचिरात् पतिते [को?का]लकटाक्षवर्त्मनि ।
पदमस्य भटस्थलीश्वरो रिपुरामः स महानगाहत ।।१८।।

स भुवं शशिवंशवर्धनः समरक्षत् समरक्षतारिणा ।
महता वि[रहा?हता]तिना विशां निजदोष्णा तुलितोष्णदीधितिः।।१९।।

जयदन्तिविषाणघट्टनप्रभ[वा?वो] यस्य रणे जयश्रियः ।
ज्वलितोर्ध्वशिखः करग्रहे दहनः साक्षिपदं व्यगाहत ।।२०।।

अमुनैव भुवि प्रतीयते सविशेषं गुरु तस्य शासनम् ।
अधिरोहति त[स्य?त्र] भूभृतां सहसैव प्रणनामयच्छिरः ।।२१।।

नधता निजकर्मणि प्रजा धरणिं तत्र भुजेन शासति ।
कलिरुज्झितभूरि(विक्र?विक्रि)यः प्रययौ वासरचन्द्रविभ्रमम् ।।२१।।

ददृशे गृहमेधिनां क्षयस्तुरगाणां करिणां च बन्धनम् ।
पृथुतेजसि तत्र भूपतौ सति वन्दिग्रहणं महीभृताम् ।।२३।।

तमनु प्रमनाः समाख्यया भुवि गम्भीर इति प्रतीतिमान् ।
सुत एव तु पालकःस्वसुः क्षितिमेनां क्षपितारिरग्रहीत् ।।२४।।

प्रणिहत्य विपक्षभूपतीन् परिरक्षन्नखिला भुवि प्रजाः ।
प्रजिघाय स (वेल?लेख)मुच्चधीरहताज्ञः कुहचिद्धरापतिः ।।२५।।

नयवर्त्मवशादितस्ततश्चरतो लेखममुष्य भूमिषु
अहरद् बलदर्पमोहितो मरुपूर्वस्य पतिः पुरस्य तम् ।।२६।।

द्विष(तां?ता) विहितां विलङ्घनामसहः सोढुमनल्पपौरुषः ।
सहसा मृगदष्टकेसरो विजयी सिंह इवोच्चचाल सः ।।२७।।

प्रचलद्बलवाजिहेषितश्रवणक्षोभितसर्वदिङमुखः ।
अभिहत्य चमूभिराशु तं स्वबलैस्तां स पुरीं समावृणोत् ।।२८।।

परिकोपविषाग्निकेतुभिः स्वसमुत्थैरिव सैन्यरेणुभिः
अपरोऽपि पुरा[द्] विनिर्ययौ ख[चि?नि](ता?ताद्)भूकुहरादिवोरगः
।।२९।।

अथ सा रिपुसैन्यमुत्थितं शरवृष्टिप्रकरैरशीशमत् ।
दववह्निमिवाभ्रसंहतिस्तरसा कोलपतेः पताकिनी ॥३०॥

अपनुद्य रिपून् सहस्रधा बलदर्पोद्धुरया स सेनया ।
दहनं तुहिनांशुवंशजः पुरि तस्यां रभसाददीपयत् ॥३१॥

अथ तस्य पुरस्य भूयसो ग्रसनाय स्पृहयन्निवाधिकम् ।
.... ॥३२॥

जटिलै घनधूमसञ्चयैर्ज्वलदग्निर्ध्वनिभिर्दिगन्तरम्
धरणीतलमाकुलैर्जनैस्त्रितयेन त्रितयं तदानशे ॥३३॥

खलि[लां?ता]दहनेन निर्ययुर्विषमालम्बितपुत्रका गृहात्
कबरी[ल?ख]सनावधूननप्रविलोलाग्रकरा वरस्त्रियः ॥३४॥

परितो वितता नवार्चिषा पृथवः सौधगणाः समुन्नताः ।
ज्वलता क्षयकालवह्निना विपरीता इव पर्वता बभुः ॥३५॥

वितता दहनैः सकेतुभिस्तरुणोद्यानभुवो महीरुहाम् ।
भ्रमरीपरिवेषभूषितैर्नवपुष्पस्तबकैरिवाबभुः ॥३६॥

स्वकलत्रसुतार्थपालनप्रसृताशेषजनाकुलान्तरम् ।
शरवह्निरिवेशितुर्द्विषां पुरमग्निः स निनाय भस्मताम् ॥६७॥

परिदह्य पुरीं स पाण्डवः कमनीयामिव खाण्डवस्थलीम्
परिनिःसृतकोपपावकः स्वपुरीं प्रत्यनयत् पताकिनीम् ॥३८॥

व्रजति त्रिदशेषु गण्यतां नृपतौ तस्य निरस्तविद्विषः ।
अनुजो मनुजोत्तमश्चिरं जयमानी जगतीमपालयत् ॥३९॥

** Judging from the meaning, one line seems to be missing. The numbering given in the manuscript and transcript has also been altered accordingly.

सुरभौ सुरभूरिवैभवे यशसा यत्र जगत्त्रयस्पृशा ।
शरणे धरणीपतौ विशां सुखमूषुः सकलाः कलागमाः ॥३९॥

प्रणिनिन्दुरमुष्य दारुणामसियष्टिं रिपुसुन्दरीजनाः ।
सरसामिषदायिनीं रणे प्रशशंसुर्मुदिताः पिशाचिकाः ॥४०॥

विषमेण नयस्य वर्त्मना प्रसरिण्यस्य न येन पौरुषम् [?]।
प्रतिपक्षभुजान्तरस्थितां श्रियमुच्चैः प्रसभादजीहरत् ॥४१॥

संजज्ञे सकलगुणैकपात्रमस्य
स्वस्रीयो वलभ इति प्रतीतनामा ।
भूतानामिह भुवने हितार्थमुच्चै–
रेकांशः प्रमथपतेरिवावतीर्णः ॥४२॥

प्राप्तेन प्रियनयनोत्सवं जनानां
येनेयं स्फुरदुरुतेजसा धरित्री ।
वर्धिष्णुप्रथमकलात्मकेन बाढं
चन्द्रेण प्रतिपदि शर्वरी (वि? व) रेजे ॥४३॥

जातेन येनाधिकमन्ववायः
सम्भूषितो मूषिकभूपतीनाम् ।
कृतावतारेण जगद्धितार्थ–
मंशेन विष्णोरिव वृष्णिवंशः ॥४४॥

........उत्सङ्गभुवोऽधिगच्छन्
कान्तो नृपान्तःपुरसुन्दरीणाम् ।
दृश्योऽगमन्नातिचिरेण वृद्धि
यस्तारकाणामिव मुग्धचन्द्रः ॥४५॥

शौर्यादयः क्षत्त्रकुलान्तरेऽस्मि-
न्नव्यक्तरूपं न गुणा न तस्थुः ।
आलम्बमाने ललितं शिशूनां
सर्वे परस्मिन्निव पुंसि भावाः ।।४६।।

आविर्भावादाकृतिर्लक्षणानां
यस्याचख्यौ भाविनीं राजलक्ष्मीम् ।
आह्लादस्य प्राणिनामत्र हेतुं
कालावस्था विष्टपस्येव वृष्टिम् ।।४७।।

बद्धौत्सुक्यो भाविनीं जीवलोकः
प्रत्यैक्षिष्ट श्रेयसीं यस्य वृद्धिम् ।
प्रदुर्भावं सम्प्रपन्नस्य भूमौ
बालस्येव स्वर्गपृथ्वीरुहस्य ।।४८।।

श्रीमानमुष्यावरजः कुलानां
वेत्ता कृतज्ञो वसतिर्गुणानाम् ।
रामस्य सौमित्रिरिवाजनिष्ट
राजा प्रतीतो भुवि राजधर्मा ।।४९।।

धर्मस्य पाश्चात्ययुगप्रतीक्षा-
स्थानायमानं कलिदुर्बलस्य ।
चेल्लूरनामानमसौ कदाचि-
न्महाग्रहारं वलभः प्रपेदे ।।५२।।

(त्साय? याग) प्ररोहनिभृतस्थितयः समन्ताद्
व्याप्ताः षडङ्गलतिकाभिरुदीर्णशाखाः ।

यस्मिन् विधिप्रसवबद्धफलाभिरामा-
स्तिष्ठन्ति वेदतरवो महिता द्विजानाम् ।।५१।।

संहृत्य धर्मनिचयानिह कर्मभूमौ
तस्य क्षयं विदधतस्त्रिदशाधिवासम् ।
आभान्ति यत्र चिरमास्थितमध्यरूपा
नाकौकसः प्रतिवसन्त इव द्विजेन्द्राः ।।५२।।

दण्डः करे शिखिषु च ज्वलितेषु हेतिः
प्राप्तेषु होमसमयेषु समित्प्रसङ्गः ।
उच्चावचेषु भवनेष्वतिसन्धियोगः
श्रौतेषु यत्र शुभकर्मफलेषु कामः ।। ५३।।

द्विजाश्रये यत्र पृथौ विहायसि
ग्रहैरशेषैरिव तिग्मदीधिति. ।
विहारतन्त्र[:]भृतिवृ[त्र? त्त]गोचरः
सहैव शास्त्रैरखिलैर्विराजते ।।५४।।

आत्मानं क्रतुदहने मरुद्गणेभ्यो
हव्यानमिव वहनाय शोधयन्तः ।
यत्राभ्रद्युतिमभिजुह्वतां जनानां
पाप्मानं भृतमिव धूममुद्वहन्ति ।।५५।।

नीरन्ध्रक्रमुकवनप्रसूनसूची-
विस्फोटव्यसनसुगन्धि[गन्ध]वाहैः ।
कम्रैर्य[ा? :]फलभरनम्रनालिकेरै-
र्नैष्कुट्यैर्वहति मनोहरामभिख्यम् [?]।।५६।।

यत्रोच्चैः फलभरमक्षमान् विसोढुं
नीडोत्थैः शुकविरुतैः कृतार्थनादान् ।
व्यालोला बलवदिवावलम्बमाना-
स्ताम्बूल्यः क्रमुकतरूनभिष्वजन्ते ॥५७॥

फलमिव मधुरं वः केवलं कालपाके
वहति वपुरशेषं सातिरेकं रसं नः ।
इति शशिकरशुभ्रैर्यत्र पुष्पैः पुरस्तात्
कुलमिव कदलीनामिक्षुयष्ट्यो हसन्ति ॥५८॥

अपिदधति विहायः शालिगोपाङ्गनाभि-
र्निगमभुवि निरस्ता यत्र गीतान्तरेषु ।
अनतिविघटितोच्चैर्वक्त्रमुक्तार्तनादाः
कल(म)कणिशखण्डोद्ग्राहिनस्ताम्रतुण्डाः ॥५९॥

यत्र द्विजन्मतिलकौ भवनन्दिसंज्ञा-
वक्षीयमाणगुणरत्नचयावभूताम् ।
मोहापनोदकरणार्थमिव प्रजानां
शुक्रश्च शक्रसचिवश्च दिवोऽवतीर्णौ ॥६०॥

तत्राथ चित्रकुसुमस्तबकावतंसै-
रुद्यानशाखिभिरुपस्कृतदिग्विभागम् ।
श्रीमत् सशम्बरपदप्रथिताभिधानं
पुण्यंहरेर्नृपसुतः पुरमाससाद ॥६१॥

यत्रेन्द्रनीलरुचिना हरिणा सुदीर्घं
व्यातन्वता वसतिमु[ण्डि? ज्झि]तभोगभारम् ।

अद्य ध्रुवं वहति शोच्यतरामवस्थां
मुक्तागुणस्तरलहीन इवोरगेन्द्रः ॥६२॥

बधिरितभुवना(न्त?न्ते)यत्र मेघोपरावै-
र्बलिपटहनिनादे तुल्यमुज्जृम्भमाणे ।
उपवनशिखिवध्वः केकया(हला? वल्लभा)नां
कलतरमतिहृष्टं शब्दमाम्रेडयन्ति ॥६३॥

उद्याने मधुमथनस्य लोलशाखा
यत्प्रान्ते सुरवनिता इवान्तरिक्षे ।
नृत्यन्ति स्फुटमनिलोपधूतघण्टा
वादित्रध्वनितलयेन वैजयन्त्यः ॥६४॥

उपवनतरुपुष्परेणुजालैः
परिमललोलवरद्विरेफशारैः ।
नभसि सुरभिदः प्रियाय यस्मिन्
विरचयतीव मरुद् वितानमुच्चैः ॥६५॥

द्रुततरमवतीर्य तत्र यानाद्
भुवनगुरुं शिरसा प्रणम्य शौरिम् ।
पुरमथ शतसोमनिर्मितं तत्
स पुररिपोरभिराममाससाद ॥६६॥

यत्राग्रहर्म्यपरिलीननवाम्बुवाह-
विद्युल्लताकृतचलाचलचित्रलेखम् ।
विप्रोपहारविधितोषितचित्तवृत्तिः
शश्वद् विमानमधितिष्ठति चन्द्रमौलिः ॥६७॥

उद्घुष्यते भुवि जनेन विचक्षणेन
यत्रेप्सितानि ददति प्रविचक्षणेन ।
षट्कर्मिणा मुनिवरिष्ठसभासमेति
निःशेषवेदमुखरेण समस्तशास्त्रम् [?]।।६८।।

वादोन्मुखेन कृतधर्मकथान्तरेण
.... ।
(अ?पु)ष्टा सभा द्विजगणेन सदैव साक्षा-
दाभाति यत्र वचसामधिदेवदेव ।।६९।।

तत्र द्विजन्मतिलकैर्विहितः समेत्य
तद्ग्रामरक्षणविधौ सदृशे स तिष्ठन् ।
तूर्णं नरेन्द्रतनयः परिजीर्णसन्धि
[भूँ?भूयः] [प?पुरं] पुररिपोर्घटयाम्बभूव ।।७०।।

अथ द्विजानां शिवशंसिनीभि-
राशीर्भिरुत्तेजितमङ्गलेन ।
भूयः समासादि नृपात्मजेन
ग्रामादमुष्माद् गुरुपादमूलम् ।।७१।।

इति मूषिकवंशे त्रयोदशः सर्गः ।

चतुर्दशः सर्गः

अथ यौवराज्यमनवद्यं नृपतिवरलक्षणान्विते ।
नीतिनिपुणहृदयो वलभे स चकार रामघटमूषिकेश्वरः ॥१॥

युवराजशब्दमथ तत्र विनयवति यूनि बिभ्रति ।
स्थैर्यमधिकमभजन्नृपतिर्विततप्ररोह इव पार्थिवो महान् ॥२॥

स्फुरता भुजेन शितखड्गरुचिमषिमलीमसत्विषा ।
प्रादुरभवन्निव विद्विषतां स पुरः स्मृतिं गतवति व्यतिक्रमे ॥३॥

तमनल्पवित्तकुसुमाढ्यमुदितकरुणार्द्रपल्लवम् ।
कीर्तिपरिमलमुचं व्यलगन्नलिनां क्षमारुहमिवार्थिनां गणाः ॥४॥

सुकुमारचित्तवपुषं तमभिजगुरङ्गना........ ।
क्रूरहृदयचरितं सुतरामपरं कृतान्तमरिपक्षयोषितः ॥५॥

वसुधाधि(स्य)पहृदयेन यदभिलषितं क्षणेन सः ।
तत्तदकुरुत यथाभिमतं पुरुषस्य काय इव पार्थिवात्मजः ॥६॥

अथ केरलं प्रति स चोलनृपतिमभियातुमुत्थितम् ।
साह्यकृतमतिरमुं वलभं प्रजिघाय रामघटमूषिकेश्वरः ॥७॥

प्रतिहत्य तं स घनरेणुनिवहपिहितार्करोचिषा ।
तूर्यंतुलितजलदध्वनिना प्रययौ बलेन सह दक्षिणां दिशम् ॥८॥

निजवंश्यराजतनयस्य तपनपरितापमु[द्वी? त्थि]तम् ।
रोद्धुमुपगतममुष्य बभौ तुहिनांशुमण्डलमिवोष्णवारणम् ॥९॥

पटहारवः प्रमथितारिहृदयमतिभूरिरुत्थितः ।
तस्य बलविसरदं(र)करो बधिरीचकार सकलं दिगन्तरम् ।।१०।

गजबृंहितानि परिभूय तुरगवरहेषितानि च ।
तस्य महितयशसो ववृधे पथि वन्दिवृन्दजयमङ्गलध्वनिः ।।११।।

द्विरदाश्वयानगतयश्च कृतपरिकरैः समं बलैः ।
राजतनयमथ भूमिभृता(र?म)नुसस्रुराशु तनयाः सहस्रशः ।।१२।।

प्रचलत्तुरङ्गमतरङ्गनिवहकलिले बलार्णवे ।
द्वीपललितमवनिपतिभिः समधि...गजघटाः प्रपेदिरे ।।१३।।

समतीत्य मार्गमतिदीर्घमनतिबहुभिः प्रयाणके ।
क्वापि नृपतितनयः सहसा विहितोपकार्यमथ सद्मवीक्षत(?) ।।१४।।

निजमण्डल............व वेषनिगदितविपत्तिमागतम् ।
कृतनृपतितनयाय[?]लघु प्रतिहारिकाथ पुरुषं न्यवेदयत् ।।१५।।

विहितः प्रविश्य गलिताश्रुलुलितनयनः प्रणम्य सः ।
स्वर्गमुपगतमुष्य गुरुं निजगाद रामघटमूषिकेश्वरम् ।।१६।।

उपकर्ण्य चैदुरुसत्त्वविशदहृदयोऽपि तत्क्षणम् ।
अश्रुकलितनयनाम्बुरुहो निममज्ज भूयसि स शोकसागरे ।।१७।।

अथ विक्रमोपहितरामपदविरचिताह्वयं रिपुम् ।
प्राप्तमलपद(भि?पि)वश्यवरः पदमाशु रामघटमूषिकाह्व(य)म् ।१८।

प्रतिघः प्रतापनिधिरस्य शुचमपनुदन्नथास्फुरत् ।
मेघविसरमलिनां सहसा दिवसस्य वृत्तिमिव तिग्मदीधितिः ॥१९॥

प्रशमं ययुर्ज्वलति तस्य सपदि वदने विसर्पिणः ।
कोपदहनपरितापवशादुपशोषभाज इव बाष्पबिन्दवः ॥२०॥

स्वकरं करेण स पिपेष कुपितहृदयो मुहुर्मुहुः ।
हस्तगतमवनिपालसुतः परिचूर्णयन्निव सपत्नमण्डलम् ॥२१॥

अथ तां विहाय गुरुवृत्तिमभिपतति मानसे रिपून् ।
तस्य तलमभिविसृज्य भुवनं सहसैव दृष्टिरपि यष्टिमस्पृशत् ॥२२॥

उदतिष्ठताशु स बलेन कृतपरिकरेण संवृतः ।
अर्थमथ तदभिवेदयितुं विससर्ज दूतमभि केरलेश्वरम् ॥२३॥

तुरगाकुलेन सह तूर्णमथ निववृते बलेन सः ।
ग्राहनिवहगुरुणा पयसा विनिवृत्तवेल इव यादसाम्पतिः ॥२४॥

उपसृत्य नित्यसुसमृद्धविभवगुरुधर्मवित्तमम् ।
तत्र सुगतमतिकारुणिकं शुचिमूलवासजुषमभ्यवन्दत ॥२५॥

प्रतिगृह्य च प्रवरजैनजनकृत(महा)जयाशि(षा?षः)
कोपभरितहृदयः सहसा प्रययौ परैरपहृतं स्वमन्दिरम् ॥२६॥

विहिताभिषेकमथ तत्र नरपतिविहारदुर्गमम् ।
प्राज्यबलमुपरुरोध बहिर्महता बलेन वलभः स मूषिकम् ॥२७॥

स्फुरितेऽथ तत्र पृथुधाम्नि बलवदभवद् दुरासदम् ।
को[प]प[य]सि गुरुपक्षभृतो लघु राजहंसनिवहा विजह्रिरे ...॥२८॥

धृतसादिना हयवरेण कृतमखिलं सहस्रधा ।
अब्धिजलमखिललोकभृता परिसर्पदेव मुहुरादिपोत्रिणा ॥२९॥

अभिधावतो हयबलस्य सततमभवद् विलम्बना ।
याव (दुद? दप) हरति सादिगणे हृदयाद् द्विषामपि निखातमायुधम् ।३०।

परिघट्टने जववशेन (न) भसि तरसैव शस्त्रयोः ।
एकतरमपनुद (त्य) परे विविदे जनैः प्रहरतोर्बलाबलम् ॥३१॥

शरकीलितोरुयुगलोऽपि समिति सु (द? शूक) शितैः शरैः ।
शत्रुनिवहमभिनत् सुतरां प्रययौ न तुष्टिमभियोगविप्लवात
॥३२॥

शितखड्गभिन्ननिजकुक्षिरवनिपतितोऽपि मूर्च्छया ।
चित्तमलभत परः शनकैः प्रसभान्तकर्षिखगपक्षमारुतैः ॥३३॥

शितभल्लकृत्तमपरस्य परिपलितरक्तलोचनम् ।
तूर्णमपत [दि? द] तिरागवशात् प्रकृताभिजल्पमुखराननं शिरः ॥३४॥

विपुलेन दन्तयुगलेन पतितमभिहत्य विद्विषम् ।
क्षेप्तुमभवदलमूर्ध्वकरं विशिखोर्ध्वकीलितकरो न वारणः ॥३५॥

परयोः परस्परनिकृत्तसकलपरिहीणशस्त्रयोः ।
प्रेक्ष्यमकृतसमरैरभवत् सुचिरं नियुद्धमुभयत्र सैनिकैः ॥३६॥

अगमत् स्ववंश्यरणशोकपतितशशिलक्ष्मविभ्रमम् ।
शुष्करुधिरपरिनीलतनुः पतितातपत्रसुखशायिनी शिवा ॥३७॥

व्यपदभरितहृदयमवनिराशुवमन्.....................
.....................अहिमद्युतौ मणिरिवाशुशुक्षणिम् (?) ॥३८॥

स्वपदोपरोधपरिकोपकलुषितविवृत्तलोचनः ।
सिंह इव सपदि पञ्जरतः शिबिरादसौ नरपतिर्विनिर्ययौ ॥३९॥

प्रतिपक्षकोपदहनस्य वलभपृतनासमुद्भवः ।
दीप्तिजननमहिमा रजसां प्रकरः समीरपदवीमगाहत ॥४०॥

अधिरूढवाहनमथाशु कृतपरिकरं धृतायुधम् ।
दर्पसमुचितबाहुबलं द्वितयं मिथः पृतनयोः समभ्ययात् ॥४१॥

महता नरेन्द्रनिवहेन परिचकृषिरे महेषुधेः ।
अहिकुहरत इवाहिवरा विषयोगभीषणमुखाः शिलीमुखाः ॥४२॥

ककुभो दश प्रवलयोधकरपरिधुता धनुर्लताः ।
मङ्क्ष्वविचलितविपक्षधियश्चलशिञ्जितध्वनिशतैरपूरयत् ॥४३॥

सुभटाननान्यरुणितानि रणमुखसमुत्थ(यो?या)रुषा ।
जग्मुरलधुनि धनुर्वलये परिवेषभिन्नरविमण्डलश्रियम् ॥४४॥

जहतः क्षणादटनिरत्नरुचिकुसुमिता धनुर्लताः ।
दर्पभरविकसितानि नृणां मुखपङ्कजान्यभिययुः शिलीमुखाः ॥४५॥

धवलातपत्रशतपत्रवलयिनि रणानिलोद्धते ।
सैन्यसर...मधिकृत्य युधि विनिहतं........सुरस्त्रियः ॥४६॥

शातबहुशरकृपाणगदापरिखण्डितं.......... ।
.... वपुरमुष्य वद्धिका[?] ॥४७॥

विवरप्रविष्टशुनं[कोडि?कालि]भषितविरुतेन भेरिकाः ।
युद्धरभसपतिताः सततं निजभैरिकक्षतिशुचेव चुक्रुशुः ॥४८॥

नभसीतरेतरनियुद्धविहगयुगतुण्डविच्युतम् ।
क[व्य]मतिपृथु पिशाचिकया जगृहे समुल्लुलितलोलजिह्वया ।।४९।।

प्रियमेत्य कण्ठगतजीवमुरसि पतितं पराप्सराः ।।
तस्य विनिहितमतिर्वरणे दयितामममर्षकुटिलाक्षमैक्षत ।।५०।।

व्रगमत् क्षयं वलभसैन्यजलधिविसरेण भूयसा ।
अथ समिति रिपुराजचमूः पृतनेव पाण्डवबलेन कौरवी ।।५१।।

परिही[य?ण]बाणबलराशिरपि रिपुबलेन भूयसा ।
दावहतवन इव[ा][प?द्रि]पति र्न चचाल रामघटमूषिकेश्वरः ।।५२।।

समरं जगत्क्षयनिमित्तममुकमिव रोद्धुमुद्य[ता?तः] ।
अस्तमगमदथ घर्मरुचिः प्रतिसंहृताखिलमरीचिमण्डलः ।।५३।।

परिखण्डितेभसुभटाश्वरुधिरसरितेव मेदिनी ।
मूर्च्छदभिनवजपारुणया घनपद्धतिर्द्रुतमरोधि सन्ध्यया ।।५४।।

पृतनाजनस्य निहतस्य सपदि जहतः स्वचेतनाः ।
प्रादुरभवदविवेककरं मनसि प्रवेष्टुमिव मेदुरं तमः ।।५५।।

समरेषु वीरनिवहस्य दिवि[वि?]कृतपदैरिवात्मभिः ।
तावदगणितसहस्रशतैरुडुभिः प्रकाशतरलैर्विदिद्युते ।।५६।।

अपनुद्य सान्ध्यमतिभूरि तिमिरमुदियाय चन्द्रमाः ।
शत्रुबलमभिनिहत्य महत् प्रभविष्णुनेव वलभः स्वतेजसा ।।५७।।

पृथिवीपतिः प्रकृतिभिः स निशि नयगतिं विबोधितः ।
भूरिशिबिरमपहाय ययौ प्रबले रिपौ गतिरियं हि भूभृताम्
॥५८॥

तीव्रप्रतापभरिताखिलदिग्विभागे
भूत्वं युवः स्फुरति तत्र नरेन्द्रसूनौ ।
तत्याज मूषिकपतिः स विहारदुर्गं
सूर्योदये तुहिनरश्मिरिवान्तरिक्षम् ॥५९॥

वध्यान् निहत्य वलभः प्रविहाय हेयान्
ग्राह्यान् प्रगृह्य परिपीड्य च पीडनीयान् ।
लक्ष्मीमथानुगुणयन् नयविक्रमाभ्या-
मञ्जाय मूषिकभुवं स वशीचकार ॥६०॥

दृप्तारिकोपशिखिना हृदि तप्तमूर्ते-
र्निर्वापणार्थमिव मङ्गलदेवतायाः ।
प्रावर्तत प्रकृतिपौरजनाभिरामः
पुण्ये विभोरहनि तस्य महाभिषेकः ॥६१॥

प्रध्मातशङ्खतुमुले सह वन्दिघोषैः
संमूर्च्छिते महति मङ्गलतूर्यनादे ।
मन्त्राभिपूतसलिलैर्महितः पुरोधा-
स्तं शातकुम्भकलशैरलमभ्यषिञ्चत् ॥६२॥

आक्रामत्यभिनवचन्दनाङ्गरागै-
र्भूभर्तर्युरु कनकासनं प्रपेदे ।
संसक्तं मणिभिरुदंशुभिः सुमेरोः
शृङ्गस्य त्रिदशगजास्थितस्य शोभाम् ॥६३॥

पर्यस्यन्मकुटमणिद्युतेरधस्ता-
च्छत्रस्य प्रकृतिजनेन सेव्यमानः ।
उत्तुङ्गं सपदि नृपासनं प्रपन्नः
संप्रापद् व्यजनवतीं स राजलक्ष्मीम् ।।६४।।

निःशेषक्षितिवलयोल्लसत्प्रतापे
............धरणिपतौ प्रशान्तिमापुः ।
सम्प्राप्ते नवमुदयं सहस्ररश्मौ
नक्षत्रद्युतय इव श्रियो नृपाणाम् ।।६५।।

सांयात्रिकप्रहितपोतपथावतीर्ण-
द्वीपान्तरद्रविणसारवृतापणाढ्यम् ।
किल्लासरिज्जलधिसङ्गमसन्निकृष्टं
मराहिनाम स पुरं नृपतिश्चकार ।।६६।।

भूपश्चकार पृथुगोपुरभिन्नतुङ्ग-
प्राकारचित्रविहितातुलगुप्तशोभम् ।
वर्धिष्णुखातसलिलं पृथुभिस्तरङ्गै-
र्बिभ्रत् सदा वलभपत्तन(वृ?मृ)द्धिमुच्चैः ।।६७।।

शा(न्ते?न्त्यै)प्रशान्तविपदं शरणागतानां
चण्डेश्वरस्य वटुकेश्वरमन्दिरस्य ।
आखण्डलारिबलदुस्सहवीर्यमार्य
भक्त्या स देवमनयन्नृपतिः प्रतिष्ठाम् ।।६८।।

उत्तीर्णसागरजलेन कुलं रिपूणां
हत्वा बलेन हरिकुञ्जरभीषणेन ।
लङ्काह्वयं रघुपतिः परमेकमेव
द्विपान् बहूनभृत रामघटेश्वरस्तु ।।६९।।

अभिमतफलदाने याति चिन्तामणिश्च
स्फुटतरमिह लोके पारिजातश्च कीर्तिम् ।
प्रणयनियमवृत्तिः प्रार्थनानिर्व्यपेक्ष-
स्तदुभयमतिशिश्ये तत्त्वतो हेहयेन्द्रः ॥७०॥

किरणेन शुभ्रगुणरत्नसम्पदां
यशसा शिवेन दशदिग्विसर्पिणा ।
मुखरीचकार कविलोकमूर्जितं
वलभः स रामघटमूषिकेश्वरः ॥७१॥

दृष्टान्तभूतचरितो महतां स राज्ञां
दिष्टान्तमेत्य गलिते वयसि क्षितीशः ।
अम्भोधिवीचिरशनां जगतीमनाथां
भूयश्चकार चपलां भुवि राजलक्ष्मीम् ॥७२॥

सम्प्राप्ते लोकमत्यं सकलगुणनिधौ मूषिकाणामधीशे
दृष्ट्वा दृष्ट्वा समन्तादसदृशचरितानुज्झती भूमिपालान् ।
उत्साहत्यागशौर्यप्रभृतिगुणगणानाश्रयान्वेषणीव
भ्राम्यन्ती दिक्षु तस्य स्फुटकुमुदवनस्पर्धिनी भाति कीर्तिः
॥७३॥

पतित इव नभो हिमेतरांशौ
गलित इवापि च जीविते शरीरम् ।
अशिवमतितरामशेषमापद्
धरणितलं रहितं नरेश्वरेण ॥७४॥

इति मूषिकवंशे चतुर्दशः सर्गः

पञ्चदशः सर्गः

श्रीकण्ठ इत्यवरजोऽथ नृपस्य तस्य
श्रीकण्ठपादसरसीरुहराजहंसः ।
श्रीकण्ठनाथ इव शौर्यगुणेन हर्ष-
श्रीकण्ठसङ्गिनि भुजे भुवमाससज्जे ॥१॥

पीनोन्नतस्थिरतरांसतटंप्रलम्बं
ज्याघातलाञ्छितकठोरतरप्रकोष्ठम् ।
कौक्षेयकत्सरुकिणाङ्कतलाङ्गुलीकं
यद्बाहुदण्डमजितं भजते जयश्रीः ॥२॥

भर्ता फणीन्द्रशयनीयमिवेन्दिरायाः
क्रोडं पितामह इवादिसरोरुहस्य ।
कैलासशैलमिव च स्वयमेव देव-
श्चेतो यदीयमधितिष्ठति शूलपाणिः ॥३॥

तिष्ठन् समं कमलया शरदभ्रशुभ्रे
पर्यावृते जगति च स्वयशोवितानैः ।
क्षीराम्बुराशिजलमध्यकृतास्पदस्य
देवस्य कैटभरिपोस्तुलयत्यभिख्याम् ॥४॥

यस्य प्रतापदहनो रिपुमण्डलोष्णः
प्रह्लादमावहति सज्जनमानसानाम् ।
ब्रध्नातपोऽपि परितापितसर्वजन्तु-
र्बध्नाति शर्म बहुलं कमलाकराणाम् ॥५॥

निर्भिण्णवैरिहृदयप्रतिघाग्नितप्ता
हस्त्यश्वशोणितजलानि समापिबन्ती ।
यत्खड्गयष्टिरधिरोहति तैक्ष्ण्यहेतो-
रावर्तिनीं प्रतिचमूरथचक्रशाणाम् ॥६॥

कल्पद्रुमः प्रणयिनां सुहृदां शशाङ्को
बन्धुः सतां सदनमम्बुजदेवतायाः
वर्गस्य यः समिति विद्विषतां कृतान्तः
कान्ताजनस्य भगवानपि पुष्पकेतुः ॥७॥

क्रीडाचलान् क्षितिधरेष्ववलोकितेषु
जैत्रद्विपान् वनगजेन्द्रकदम्बकेषु ।
भ्रष्टाः स्वराज्यविभवाद् यदरातिनार्यः
स्रोतस्विनीषु च कृताः सरितः स्मरन्ति ॥८॥

पुष्णाति यः प्रतिदिनं श्रियमाश्रितानां
पुष्णाति चैव विपदं प्रतिभूपतीनाम् ।
पाता भुवः सकलसागरवारिसीम्नः
पाता च यः सकलकाव्यकथामृतानाम् ॥९॥

उद्घुष्यते जगति तत्त्वविचारमुग्धै-
र्मिथ्या कृतज्ञ इति यः सकलैर्जनौघैः ।
अह्नाय विस्मरति यः शरणागताना-
मागः प्रवृद्धकृतमप्यरिभूपतीनाम् ॥१०॥

धर्मानुकूलमसकृद् विदधाति योऽर्थं
धर्मार्थयोरनुगुणं च करोति कामम् ।

इत्येषु सन्निपतितेषु कृतात्मनां हि
  वृत्तिर्बलाबलवशेन विचक्षणानाम् ।।११।।

धत्ते स रत्नमकुटं क्षितिपालशैलः
  पृथ्वीमुभौ जगति यश्च हिमाचलश्च ।
सिंहासने महति तिष्ठति तत्र पूर्वः
  सिंहासनं तदपरः शिरसा बिभर्ति ।।१२।।

अक्रोधभर्त्सितनवाम्बुदचक्रवालै–
  रव्रीलसंवृतमुखैरनिशाततीक्ष्णैः ।
आयोधनेष्वलमनासवपानमत्तैः
  स्तम्बेरमैर्जयति यः सकलान् विपक्षान् ।।१३।।

प्रत्यग्रपुष्पभरभारविनम्रशाखं
  संसेव्यमानमभितो मुदितैर्विहङ्गैः ।
छायावितानशिखरं विततप्ररोहं
  तिष्ठन्तमध्वनि तरुं कवयो यमाहुः ।।१४।।

यस्य प्रतापदहनं रिपुदाहदक्षं
  सर्पन्तमप्रतिहतं सकलासु दिक्षु ।
चत्वार एव पवनोच्चलितैः समन्ताद्
  रुन्धन्ति सिन्धुपतयः पृथुभिस्तरङ्गैः ।।१५।।

यत् स्थावरः सुरतरुर्यदचेतनश्च
  चिन्तामणिर्यदपि सा सुरभिस्तिरश्ची ।
प्रायेण तत् त्रयमिदं जगति प्रदाने
  कर्तुं यमप्रतिसमं विदधे विधाता ।।१६।।

गम्भीरतामतिपयोनिधिमुद्वहन्तं
बिभ्राणमद्रिजयिनीं भृशमुन्नतिं च ।
कोटिस्पृशोऽपि बलपौरुषविक्रमाणा-
मुल्लङ्घयन्ति जयिनं यमरातिलोकाः ।।१७।।

सज्जैः स्वसैन्यविसरैः सह बद्धकक्ष्यः
पश्चात् पदं समरमूर्धनि यो दधाति ।
प्रागेव सा समरभूः क्षणदाचरीभि-
राक्रम्यते च गगनं सुरसुन्दरीभिः ।।१८।।

अर्थिव्रजस्य सुदृशां च कृतार्थकामः
सम्मानसाध्वसकरोविदुषां द्विषां च ।
दोष्णाभिरक्षति चिरं शिरसा बिभर्ति
विश्वम्भरां च चरणावपि चन्द्रमौलेः ।।१९।।

यत्सम्प्रयोगसमयेष्वनपेक्ष्यमाणः
कान्ताजनेन नवविभ्रमलम्पटेन ।
आकाङ्क्षितः पुनरमुष्य वियोगकाले
स्वप्नः कृतेर्ष्य इव तासु पदं न धत्ते ।।२०।।

पृथ्वी भुजेन विपुलेन जितावशिष्टा
....दत्तमपि चार्थिजनाय वित्तम् ।
आश्चर्यकीर्तिसुलभः प्रतिहत्य सौख्यं
शल्यायते महति चेतसि यस्य नित्यम् (?)।।२१।।

यस्येन्द्रनीलमणिभित्तिमयूखबद्ध-
मन्तःपुरेषु बहलोदयमन्धकारम् ।

भूयः प्रदीपतरला ललनाजनस्य
भूषामणिप्रकरदीधितयो हरन्ति ॥२२॥

सामादिभिः स्वविषयाचरितैरुपायैः
कार्याणि भूमिपतयः खलु साधयन्ति ।
सङ्कल्पमात्रघटितार्थविधिर्यं एष
तिष्ठत्यचिन्त्यमहिमा भुवि कोऽपि देवः॥२३॥

उच्छब्दकौशिकमुदग्रतरार्कसोमं
पर्याकुलं हुतभुजा सहितैर्मरुद्भिः ।
सम्प्रापुरस्तकरणा रिपवो यदीयाः
शैलाग्रश्रृङ्गममरेश्वरमन्दिरं वा ॥२४॥

देवो मुकुन्द इव पन्नगवैरिलक्ष्मा
सोमान्वयप्रणयमीश इवादधानः ।
काले पितामह इवार्थितजन्यसर्गो
यः शश्वदार्द्रसुमना मरुतामिवौघः ॥२५॥

आलम्ब्य चापमपवर्तितराजहंसं
वातोत्तरेण शरवृष्टिमुचा जवेन ।
तीव्रप्रकोपजनितोद्धतसिंहनादा
यस्याहवेषु जलदा इव भान्ति योधाः ॥२६॥

तीव्रप्रतापनिधिरप्यतिमात्रमार्द्रो
वृत्तस्थितोऽपि चतुरश्रतया समेतः ।
दक्षो नयेऽप्यविनयान्यरिषु प्रकुर्व-
न्नत्यद्भुतां वहति यः स्फुट(या? र्मा)त्मावृत्तिम् ॥२७॥

अष्टाभिरेव तनुभिर्न बिभर्ति लोकान्
नेत्राग्निना मनसिजं च न निर्ददाह ।
रुद्रेषु नास्य गणना सुरसत्तमेषु
प्राज्ञास्तथापि च यमीश्वरमामनन्ति ।।२८।।

आशागजेन्द्रनिवहाः कुलभूधराश्च
शेषश्च यस्य सुमहानपि बाहुदण्डः ।
त्यक्तान्यकार्यरतयश्चतुरन्तसीमां
बिभ्रत्यमी सममिमाखिलां धरित्रीम् ।।२९।।

प्रक्षीणशत्रुनिवहं परिवृद्धशक्ति
षड्वर्गमोक्षचतुरं गजब(न्धु? न्ध)युक्तम् ।
एकातपत्रमथ नैकनरेन्द्रजुष्टं
यस्यास्तदोषमुदितर्द्धि विभाति राज्यम् ।।३०।।

यस्याधिकस्य परिहारजुषां द्विषां च
नालक्ष्यते जयपराजययोर्विशेषः ।
भूयो यदेष निगलैश्चरणानमीषां
पादौ च यस्य मकुटैः परिपीडयन्ति ।।३१।।

सम्प्रस्थिते रिपुगणस्य रणाय यस्मिन्
जन्ये धियं विदधतो विभवत्यजन्यम् ।
उद्यच्छतोऽपि करणीयविधौ जनस्य
सम्पत्फलं बलवतो हि विधेर्विधेयम् ।।३२।।

दर्पेण (यःस? यस्स)शरकार्मुकमुद्गृहीत-
मौ(र्वी? र्व्या) सह प्रतिनरेन्द्रधिया धुनानम् ।

नम्रीकृतं सह नभश्चरदृष्टिपातैः
कीर्त्या सहोद्गिरति संहतिमाशुगानाम् ।।३३।।

स्वर्गं प्रदाय रिपवे धरणीं तदीयां
दत्त्वा वसु द्विजगणाय तदाशिषोऽपि ।
वक्षो मनोज्ञमपवर्ज्य विलासिनीभ्यो
गृह्णाति यः प्रतिदिनं हृदयानि तासाम् ।।३४।।

जीयाच्चिराय करवालसखेन दोष्णा
राजायमप्रतिरथो भुवि राजवर्मा ।
पीत्वेति रक्तरसकं सह कामिनीभि–
र्नृत्यन्ति यस्य रणमूर्धनि यातुधानाः ।।३५।।

संमूर्च्छितेन कलिना सकलासु काष्ठा–
स्वम्भोधिनेव रभसादभिभूयमानाम् ।
प्रत्युज्जहार धरणीं भुजदंष्ट्रयेमां
भूयोऽवतीर्ण इव यः प्रथमो वराहः ।।३६।।

लक्ष्म्या प्रतीतयशसा भुवि कर्तृनाम्ना
भर्ताह्वयेन च दधद् वटुकेश्वराख्याम् ।
पुंसो वपुर्विधिरिवैष जरावतीर्णं
भूयो नवं व्यधित मन्दिरमिन्दुमौलेः ।।३७।।

यच्चास्तभोगविकलं पुर एव तत्र
ख्यातं गृहं खरवनाह्वयमीश्वरस्य ।
कालेन तद्विघटितं समधत्त भूयः
पक्षोपलक्ष्यमिव बिम्बमतिग्मरश्मेः ।।३८।।

योऽहीरणेश्वर इति प्रथितं पृथिव्यां
सौधाग्ररुद्धहरिदश्वरथाश्वमार्गम् ।
जीर्णं कदाचिदवलोक्य तमेव दध्यौ
देवस्य मन्मथरिपोर्दयितं निवासम् ॥३९॥

यस्यैव मूर्तिमतुलां सचराचरस्य
वासं वदन्ति कृतिनो भुवनत्रयस्य ।
भग्नेयमस्य वसतिः परमेश्वरस्य
कष्टं भवेदिह जगत्यमुतः किमन्यत् ॥४०॥

विश्लिष्टचञ्चलमहोपलसन्धिबन्धं
भग्नेक....पतितजर्जरदारुखण्डम् ।
शम्भोरिहैव निलयं प्रविशीर्यमाणं
दृष्ट्वा ममाद्य झटिति स्फुटतीव चेतः ॥४२॥

मूर्ध्नि च्युतावरणके मुहुरष्टमूर्तेः
पादेषु वासरपतेः स्फुटमापतत्सु ।
छायामिमां विदधता परितापहेतु-
मर्थो ममाद्य क इवातपवारणेन ॥५२॥

दाक्षायणीघटितवामभुजं वरेण्यं
भूयः करेण भुजगान् परिलालयन्तम् ।
अभ्याशभित्तिबिलकोटरवासिनोऽमी
सर्पास्त्यजन्ति न कृतज्ञतयेव शर्वम् ॥४३॥

*शीतांशुखण्डसरले शिरसि स्मरारे-
र्यस्मिन् पपात सुरलोकसरित्प्रवाहः ।

---

* Thise stanz is not seen in 'ख'

प्रासादभङ्गगतयो घुणचूर्णमिश्रा–
स्तस्मिन् पदं दधति सम्प्रति वृष्टिधाराः ॥४४॥

क्रौर्येण देवनिलयान् गुरुभोगभा(जं?जः)
कृत्वा स्वपूर्वविहितानपि शून्यशून्यान् ।
ऊ(र्वा?व्यां) प्रदाय विभ(वां?न्) स्वकुलीनभार्या(न्)
काष्ठामिमामुपनयन्ति निवेश्य देवान् ॥४५॥

शुश्रूषणं मम गुरोस्ततभीषणस्य(?)
गौरीपतेर्भगवतोऽपि च दासकृत्यम् ।
धर्माभिरक्षणमपि क्षितिमण्डलेऽस्मिन्
कृत्वा विमानमिदमद्य समं करोमि ॥४६॥

सञ्छिन्न च....मिति स र्थितपुण्यकर्ता
..................भगवतस्त्रिपुरान्तकस्य
भूयश्चकार तदसौ प्रतिमावनेष....
मव्यक्तशेषमिव विष्टपमादिदेवः ॥४७॥

प्राप्ते पुनर्नवदशां वटुकेश्वरेऽस्मिन्
सोऽह्रीरणेश्वरपुरे खरकानने च ।
अर्थान् परैरपहृतानपरांश्च दत्त्वा
पूर्वोचितान् पुनरधत्त शिवोपहारान् ॥४८॥

रक्षोभुजाग्रतुलनच्युतसन्धिबन्धं
हित्वा गतास्थ इव राजतमद्रिराजम् ।
येष्वग्रचुम्बिततुषाररुचौ विमाने
वासं व्यधत्त भगवान् वृषराजकेतुः ॥४९॥

प्रासादभित्तिगलितैर्धवलीकृताभान्
दृष्ट्वा सुधाम्बुनिचयैर्भुवि वारिवाहान् ।
कोलाहलं ज(ग?ह)ति मानसयामाबद्धं
प्रावृट्सु यत्र विततास्वपि राजहंसाः ।।५०।।

यत्रोच्च(गैं?कैं)र्वसतयो हृदयानि यूनां
भूषा भवन्ति निजरूपवयोविलासाः ।
आवर्ज्य यत् प्रणयिनः स्वयमेव (यत्र)
देवः स्मरो वहति वारविलासिनीनाम् ।।५१।।

उल्लङ्घ्य येषु सततं कृतसन्निधान-
मूर्ध्वं प्रयातुमसमर्थमिवाष्टमूर्तिम् ।
शश्वद् विवर्तितमुखैरयनं (त?र)थाश्वै-
र्भासां पतिर्भजति दक्षिणमुत्तरं च ।।५२।।

आबद्धपल्लवपुटाञ्जलयो मरुद्भि-
र्नम्रीकृतोर्ध्वशिरसः परिकीर्णपुष्पैः ।
शाखाभुजैर्विटपिनो विधिना तु यत्र
शर्वप्राणाममिव सन्ततमाचरन्ति ।।५३।।

*
विस्तरिभि........................समन्ताद्
यज्जन्मभिः पटहमद्दलतालनादैः ।
नाथस्य भर्तुदुहि...................
£
............ति सान्ध्यबलितूर्यमिवाचलेन्द्रा

---

* This stenza is not seen in 'ख'

$ The Kāvya ends incompletely ,with this steza in he XVth Canto.

श्लोकानुक्रमणिका

Erratta

Page	Line	अशुद्धम्	शुद्धम्
2	1	कुडुबिनी	कुटुम्बिनी
12	8	शरा	करा
16	15	गवय्यो	गवयो
,,	22	वृचिषु	वृत्तिषु
23	2	संनिपत्य	सन्निवर्त्य
27	15	शत्रूभिः	शत्रुभिः
33	14	कृतं न	कृतं नः
34	11	तमोन्धः	तमोन्ध
,,	,,	समहौजाः	स महौजाः
36	10	उत्प्लवत्	उद्भवत्
,,	18	वेपथुः	वेपथु
37	12	मूर्ध्निनगि	मूर्ध्नि गि
39	16	हिस्वि	हिरिव
41	16	दिर्वा	दिवो
42	17	कुलंवृ	कुलवृं
44	7	र्निम	र्निम
,,	10	शङ्कुना	शङ्कुना
,,	19	परेपरे	परे परे
45	11	द्विषग्दण	द्विषद्गण
,,	20	द्रुतं	द्रुतं
,,	22	विव	विव
47	9	घनद्भभ	घनभ
48	14	धुती	द्युती

Page	Line	अशुद्धम्	शुद्धम्
51	12	वत्म	वर्त्म
52	9	त्करैः	त्कटैः
,,	12	मुहूर्मु	मुहुर्मु
53	1	वेणु	रेणु
,,	2	गुरुमा	गुरु मा
,,	7	द्धृतं	द्धतं
,,	15	थमानवि भ्र	थ मानविभ्र
,,	16	स्विश्च	स्विनीश्च
,,	17	दाह	दाव
56	10	रेणघन	रेण घन
57	2	गोतम	गोत्रम
58	14	पदिष्ट	वरिष्ट
59	1	वात	व्रात
60	17	मापि	मपि
61	1	पल्लवा	पल्वला
,,	Title	सप्तमः	अष्टमः
64	12	र्घर्म	घर्म
65	Title	सप्तमः	अष्टमः
66	8	भ्रमव	भ्रमरव
67	Title	सप्तमः	अष्टमः
67	21	युवत	युवति
68	6	नोशि	नो शि
71	22	दन्तश्छे	दन्तच्छे
74	7	वन्नस	वन्न स
76	22	द्युति प्र	द्युतिः प्र
77	2	रणां	राणां
80	22	माप्य	मप्य
81	6	भ्रू	र्भ्रू

Page	Line	अशुद्धम्	शुद्धम्
83	17	ध्यान्ध	सन्ध्यान्ध
99	5	चेलेर	चेलर
101	8	तनय	तनयं
,,	12	श्रीर्भा ना	श्रीर्भद्रो ना
102	8	ना (नाटवी) ट	नाट
103	9	गुण्यै	गण्यै
104	12	योषासहस्त्रशो	योषा (भि) स्सह सो
127	2	गबीर	गभीर
128	16	च्झि	ज्झि
131	4	नामय	नाम य
132	7	जटिलै घ	जटिलैर्घ
,,	9	(ल ? ख)	(ल ? व).
133	17	तार्य	तार्थं
135	2	ण्ठ	ष्ठ
136	16	तीर्णैं	तीर्णौ
,,	18	पुण्यंह	पुण्यं ह
138	8	देवदेव	देवतेव
139	11	धि (स्य) पह्व	धिप (स्य) ह्व
140	15	चैंदु	चैतदु
142	2	सर्पदेव	सर्पतेव
,,	12	वात	वात्
,,	16	प्रक्ष्यमक्तस	प्रेक्ष्यमक्त स
150	22	कर्तु	कर्तुं
151	13	माणं:	माण:
153	8	मिमाखिलां	मिमामखिलां
,,	21	यस्स	यस्य
157	F.N.	Stenza	Stanza
,,	,,	Steza	,,

The Mūṣikavaṁśa of Atula is a historical Kāvya written in Sanskrit by the Poet Atula ascribed to the 11th Century A. D. Written on and extolling the greatness of the Mūṣika dynasty identified by historians with the Kōlattiri royal family in North Kerala, the Mūṣikavaṁśa is a work of immense historical interest and gives a picture of the ruling royal families of Kerala and outside at that distant time in history along with the religious institutions, Buddist, Jaina and Hindu shrines and centres of learning.

This work gives graphic pictures of military organization and action and of rural and urban life.

As a literary work too, it is quite admirable. The poet followed Kālidāsa, Bhāravi and Māgha as his models in poetic excellance

TECHNICAL LITERATURE IN SANSKRIT

Edited by
S. Venkitasubramonia Iyer